अध्यापकमित्रम्

केरलपाठावलिः

# संस्कृतम्

चतुर्थीकक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते।

# TEACHER TEXT
# KERALA SANSKRIT READER

## Standard IV

**For Academic &Sanskrit Schools**

Government of Kerala
Department of Education
2015

## TEACHER TEXT DEVELOPMENT COMMITTEE

## SANSKRIT STANDARD IV

### PARTICIPANTS

1. **M.D.Dileep**,GUPS Karachal, Wayanad.
2. **Madhu.K.S,** VVAUPS Kodlamogaru, Kasargod.
3. **Sunil Kumar Nair. K,** GHSS Paivalike, Kasargod.
4. **Shiju.M.T,** GBUPS, Perdala, Kasargod
5. **Aravindakshan.N**, GUPS Mangaram, Pathanamthitta
6. **Jose.S,** GHSS, Mezhathur, Palakkad

### EXPERTS

1. **Dr. K.Mohandas,** Senior Lecturer, DIET (Rtd), M.G University, College of Teacher Education, Muvattupuzha.
2. **Dr. T.D Suneethi Devi**, Special Officer (Sanskrit) DPI, Kerala
3. **V. Vijayan**, Senior Lecturer, DIET,(Rtd) Krishna Kripa, Maruthur, Pattambi, Palakkad.

### ADVISOR

1. **Dr. R. Vasudevan Potti**, Professor (Rtd), Govt. Sanskrit College,Thiruvananthapuram

### ACADEMIC CO ORDINATOR

**Dr.Shameeja.P**
Research Officer (Sanskrit) SCERT

# भूमिका

छात्रकेन्द्रीकृता प्रवर्तनाधिष्ठिता नूतनाशयैः सन्निविष्टा च पाठ्यपद्धतिः केरलेषु प्रचलति। शिशोः समग्रं विकासं लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः। शिशुमनःशास्त्रम् अनुसृत्यैव परिष्कृता पाठ्यपद्धतिः।

प्रथमं पाठभाागः ततः पठनप्रवर्तनानि अनुबन्धश्च इति क्रमः प्रत्येकस्मिन्नेकके स्वीकृतः। पाठ्यांशस्यावतारणाय उचितसन्दर्भानायोजयितुम् अध्यापकाः सोत्सुकाः भवन्तु। तदर्थम् अध्यापकमित्रमिदम् उपकारकं भविष्यति। पाठपुस्तके निर्दिष्टानां सर्वेषामपि पठनप्रवर्तनानां प्रचालनक्रमाः उत्पन्नरूपेण परिकल्पनीयाः अंशाः निरन्तरमूल्यनिर्णयविधयश्च अध्यापकमित्रेऽस्मिन् निर्दिष्टाः। अधिकपठनप्रवर्तनान्यपि यथोचितं कक्ष्यायां दातुम् अध्यापकस्य स्वातन्त्र्यमस्ति।

लिखितानां व्यवहाररूपाणां सूचनानुसारं परिष्करणेन छात्राः भाषाप्रयोगे समर्थाः भवेयुः। निरन्तरमूल्यनिर्णयं सफलं कर्तुम् अध्यापकः यतताम्। तदर्थम् अध्यापकमित्रमिदं सहायकं भवेत्। अपि च संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

भवदीयः

**डॉ. एस् . रवीन्द्रन् नायर्**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद

# विषयानुक्रमणिका


**विषयः** **पुटसंख्या**

1. सामान्योपगमः। ---------- 05
2. संस्कृतभाषोपगमः। ---------- 16
3. मूल्यनिर्णयोपगमः। ---------- 18
4. सञ्चितपुटानां मूल्यनिर्धारणम्। ---------- 22
5. अध्यापकमित्रं नाम किम्? किमर्थम्? ---------- 28
6. वार्षिकासूत्रणम्। ---------- 29
7. प्रथमः पाठः - वन्दे केरलजननीम्। ---------- 31
8. द्वितीयः पाठः - अन्नम् अमृतम्। ---------- 37
9. तृतीयः पाठः - दीपावलिः। ---------- 42
10. चतुर्थः पाठः - श्रीनारायणगुरुदेवः। ---------- 47
11. पञ्चमः पाठः - द्विचक्रिकायाः दुःखम्। ---------- 50
12. षष्ठः पाठः - सूर्योदयः। ---------- 56
13. सप्तमः पाठः - राधिकायाः एकं दिनम्। ---------- 60
14. अष्टमः पाठः - सुभाषितानि। ---------- 64
15. नवमः पाठः - कृषकस्य कौशलम्। ---------- 70
16. दशमः पाठः - गीतामृतम्। ---------- 75
17. एकादशः पाठः - नष्टमनोरथः। ---------- 78

# सामान्योपगमः

## केरलविद्यालयपाठ्यपद्धतिः २०१५

जनसमुदायस्य जीवितगुणोत्कर्षेण केरलराज्यं सर्वस्य भारतदेशस्य आदर्शभूतं वर्तते। जनशिक्षायाः सार्वत्रिकख्यातिः तथा जनारोग्यरक्षणे उपलभ्यमाना सार्वत्रिकी पुरोगतिश्च प्राधान्येन केरलस्य प्रथमस्तरोपलब्धेः कारणम्।

सामान्यशिक्षाविभागस्य प्रादेशिकसर्वकारसंस्थानां चाधीने विद्यमानानां समग्रविद्याभ्यासपद्धतीनाम्, प्रबुद्धानां जनानां निरन्तरप्रवर्तनानां फलरूपेण च सार्वजनीनविद्यालयेषु नितरां गुणप्रकर्षः समजनि। एवम् आदर्शभूतस्य केरलदेशस्य शिक्षामण्डलस्य एतादृशगुणम् इतोऽप्यधिकतया वर्धयितुम् उत्कृष्टानां समर्थानां छात्राणां सृष्टिरावश्यकी। उत्कृष्टशिक्षायाः छात्राणामधिकाररूपेणाङ्गीकारे पाठ्यपद्धतेरपि गुणः दृढीकरणीयः प्रवर्धनीयश्च।

लोकपरिवृत्त्यनुसारं आधारिकविद्याभ्यासपरिचायन- पाठनरूपेण वर्तमाना प्रक्रिया अपि उचितरूपेण परिवर्तनीया। विद्याभ्यासप्रक्रियायां सर्वदा वर्तमानानां, विविधमण्डलेषु विद्यमानानां चिन्तासरणीनां दर्शनानां चाधारेणैव अधुना पाठ्यपद्धतेः परिष्कारः प्रचाल्यते। साधुतातः अधिकसाधुतायाः इति अन्वेषात्मकः शास्त्रीयोपगमः एव अस्यावलम्बः।

देशीयपाठ्यपद्धतिमार्गरेखायां (२००५) सप्तविंशतितमे पुटे विद्याभ्यासस्य परमप्रधानानि लक्ष्याणि अधिकृत्य सूचितविषयाः प्रसक्ताः।

१ ज्ञानं विद्यालयाद्बहिः विद्यमानेन जीवितेन सह सम्बद्धं भवेत्।

२ पठनं केवलं कण्ठस्थीकरणं न भवतीति दृढीकरणाय।

३ पाठपुस्तककेन्द्रीकृतोपगमात् व्यतिरिक्ततया छात्राणां सर्वतोमुखविकासस्य सहायकरूपेण पाठ्यपद्धतौ शेषयः निर्वचनीयाः।

४ मूल्यनिर्णयोपाधयः सरलाः पठनप्रवर्तनैः उद्ग्रथिताश्च भवेयुः।

५ राज्यस्य प्रजातन्त्रराष्ट्रिये पारस्पर्ये तात्पर्यं वैजात्यातीतं स्वत्वं च पोषणीयम्।

उन्नतचिन्तया मूल्यबोधेन च युक्ता जनता यस्य कस्यापि राष्ट्रस्य अमूल्या सम्पदेव। एतदर्थम् आवश्यकानि उदात्तचिन्तया औचित्यबोधेन च युक्तानि विद्याभ्यासप्रवर्तनानि एव विद्यालयेषु प्रचालनीयानि। राज्यपुरोगतेः गतिविगतीनां निर्णये विद्याभ्यास एव समर्थः इत्यतः क्षेत्रस्यास्य गौरवप्रवर्तनेषु अध्यापकसमाजाः भागभाजः भवेयुः इति चिन्ता अस्मासु अवश्यं भवेत्।

**१.२. पाठ्यपद्धतिपरिष्कारस्य प्रसक्तिः।**

अतीते पञ्चवर्षाभ्यन्तरे विद्याभ्यासमण्डले आगोलव्यापकतया नूतनाशयाः अवतारिताः, केचन नियमाश्च निर्मिताः। एतद्विना वर्तमानपाठ्यपद्धतेः परिमितयः न्यूनताश्च अक्कादमिकाः चर्चाभिः पठनैः च प्रत्यभिज्ञातवन्तश्च। चर्चाः पठनं च क्रोडीकृत्य परिमितीः परिहृत्य पुरोगमनं कालस्यास्यावश्यकं भवतीत्येतदेव परिष्करणममुं प्रसक्तं करोति।

निश्शुल्कं निर्बन्धं च विद्याभ्यासं लब्धुं विद्यार्थिनाम् अधिकारनियमः प्रवृत्तिपथमागतः इत्येतदेवात्र प्रधानतया सूचनीयम्। अनेन नियमेन विवक्षितेषु कार्येषु केरलराज्यं पुरोगामि भवति। उत्कृष्टः विद्याभ्यासः सर्वेभ्यो दातुमेव अस्माभिः श्रद्धा देया। एतादृशरीत्या समग्रविद्यालयविकसनपरिप्रेक्ष्यम् इति लक्ष्यं सार्थकं कर्तुम् अस्माकं पाठ्यपद्धतिः अन्तर्देशीयमानं प्रापणीया भवति। अन्तर्देशीयस्तरं कस्यापि एकस्य राज्यस्य न, प्रत्येकं स्तरं प्राप्तः छात्रः लोके यत्र कुत्रापि भवतु, तेनार्जनीयानां ज्ञानानाम् अनुभवानां च समाहृतरूपमेव भवेत् विद्याभ्यासः। अतः आगोलतले अवतारितानां, समुद्भूतानां नूतनानां प्रकृष्टानां च पठनबोधनानाम् आदर्शरूपाणि केरलराज्यस्य छात्रैरपि प्रापणीयानि। विद्याभ्यासाधिकारनियमस्थाः केचन भागाः अधो दत्ताः। ते पाठ्यपद्धतिपरिष्करणाय आधाररूपेण परिगणनीयाः।

**विद्याभ्यासाधिकारनियमः २००९**

विभागः २९ (अध्यायः - ५)

(पाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च।)

१. प्राथमिकविद्याभ्यासपाठ्यपद्धतिः मूल्यनिर्णयप्रचालनक्रमश्च सर्वकारीयेण विज्ञापनद्वारा निर्दिष्टेनाक्कादमिकाधिकारस्थानेन प्रतिपादनीयः।

२. अक्कादमिकाधिकारस्थानस्य प्रथमोपविभागप्रकारेण पाठ्यपद्धतेः मूल्यनिर्णयप्रचालनक्रमस्य

च प्रतिपादने अधोदत्तकार्याणि परिगणनीयानि।

यथा -

१. संविधाने प्रतिष्ठितैः मूल्यैः सहानुगुणता।

२. छात्रस्य सर्वतोमुखविकासः।

३. छात्रे ज्ञानस्य नैपुणीनां च क्रमेणाभिवर्धनम्।

४. शारीरिकीणां मानसिकीनां च शेषीणां सम्पूर्णविकासः।

५. छात्रसौहृदपरे छात्रकेन्द्रीकृते प्रवर्तने च समीक्षणेन पर्यवेक्षणमुखेन च पठनम्।

६. बोधनमाध्यमरूपेण मातृभाषा प्रयोक्तव्या।

७. भीतिः, मानसिकसम्मर्दसमुत्पादकसाहचर्यम् उत्कण्ठा इत्यादिभ्यः मोचनम्, तथा स्वतन्त्रतया अभिप्रायप्रस्तावे साहाय्यदानं तथा समग्रः निरन्तरश्च मूल्यनिर्णयः।

शिक्षाधिकारनियमस्य प्रयोगावसरे निरन्तरः समग्रः च मूल्यनिर्णयः संविधानबाध्यतारूपेण संजातः। एतद्दृढीकर्तुं साहाय्यकरूपेण पाठ्यपद्धतेः परिष्कारः अत्यावश्यकः। ईदृशायामवस्थायाम् एव पाठ्यपद्धतिपरिष्कारः अस्माभिः पर्यालोचनीयः।

**केरल विद्यालयपाठ्यपद्धतेः (२००९) विशेषताः काः इति पश्यामः**

१. पठितृकेन्द्रीकृता, प्रक्रियाबद्धा, प्रवर्तनोन्मुखा. मूल्याधिष्ठिता च पाठ्यपद्धतिः।

२. बौद्धिकतले, प्रक्रियातले, मनोभावतले, मूल्यानां तले च पठितृभिः प्रापणीयेषु अधिगमेषु श्रद्धां यच्छति।

३. ज्ञाननिर्मितिः इति तत्वमाधारीकृत्य रचिता पाठ्यपद्धतिः।

४. विनिमयप्रक्रियायां वैविध्यपूर्णानां युक्तानां च पठनतन्त्राणां स्वीकाराय उपयोगाय च अध्यापकानां स्वातन्त्र्यं कल्पयति।

५. पाठनाधिगमः, विषयस्वभावः पठितृणां विभिन्नस्तरः इत्यादीन् प्रत्यभिज्ञाय पठनबोधनरीतीनामाविष्कारे आयम्यता।

६. अधिगमपठनम् आशयसम्पादनरीतिः आगमनचिन्तारीतिः चिन्तनं, नैपुणीपोषणं, सहकारितापठनं, सहवर्तित्वपठनं, प्रतिफलनचिन्तापोषणं, व्यक्तिशः संघशश्च अवसरदानम् इत्यादिकं परिगण्यन्ते।

७. निश्शुल्का सार्वत्रिकी च शिक्षा सर्वेषां छात्राणां पठनाधिगमं निश्चिनोति।

प्राक्-प्राथमिकस्तरात् उच्चतरविद्यालयस्तरं यावत् समग्रतया कल्पयित्वा कृता पाठ्यपद्धतिः।

८. एकैकस्यामपि कक्ष्यायां विविधविषयाणाम् उद्दानानि (content) देशीयविषयैः सह एकीकृत्य केरलस्य पाठ्यपुस्तकानि सज्जीकरोति।

९. देशीयस्तरवत् प्रथमद्वितीयकक्ष्ययोः परिस्थितिपठनस्य उद्‌गथनं कृत्वा मातृभाषा, गणितं, आंगलेयभाषा इति पाठपुस्तकानि सज्जीकरोति।

१०. प्रथमतः चतुर्थपर्यन्तं कक्ष्यासु आङ्गलेयमाध्यमपुस्तकानि सज्जीकरोति।

११. श्रेष्ठभाषा, मातृभाषा चेति रीत्या च मलयालभाषापठनस्य प्राधान्यम्।

१२. प्राक्-प्राथमिकस्तरात् उच्चतरशिक्षास्तरं यावत् एकीकृतां पाठ्यपद्धतिं रूपीकृत्य औपचारिकविद्याभ्यासस्य भागं कर्तुं निर्दिशति।

१३. विज्ञानविनिमयसांकेतिकविद्या प्रत्येकं पाठ्यविषयत्वात् उपरि पाठ्यविषयाणां विनिमयं फलप्रदं कर्तुम् उपाधिरूपेण उपयोक्तव्या।

१४. विशिष्टश्रद्धार्हाणां छात्राणां कृते व्यत्यस्तं, विविधं, नूतनं च पठनतन्त्रमाविष्कृत्य प्रचालयेत्। एवमेव विविधानि मूल्यनिर्णयप्रवर्तनान्यपि रूपीकृत्य प्रचालयति।

१५. पठनाधिगमेष्वधिष्ठितस्य समग्रस्य निरन्तरस्य च मूल्यनिर्णयस्य दृढीकरणम्।

१६. आरोग्यकायिकशिक्षा, कलापठनं, प्रवृत्तिपठनम् इत्येतानि निर्बन्धपाठ्यविषयत्वेन परिगणयति।

१७. उच्चतरविद्याभ्यासतले कालानुसृतानि पाठपुस्तकानि सज्जीकरोति।

१८. राष्ट्रियशिक्षानियमस्याधारेण अधिकाराधिष्ठितशिक्षायै प्रामुख्यं ददाति।

१९. अध्यापकानां रक्षाकर्तृरूपेण छात्रस्य सुरक्षायै आश्रयरूपेण च वर्तितुम् अवसरः कल्प्यते।

२०. अध्यापकैः पालनीयायै धार्मिकसंहितायै प्राधान्यं (Code of professional Ethies for school teachers) देयम्।

२१. एकविंशतिशतकस्य पठननैपुणीः आर्जयितुम् उचितया रीत्या कालानुसृतः परिष्कारः। (21st century learning skills)

२२. मानुषिकमूल्ययुक्तानां परम्पराणां सृष्टये पर्याप्तम्।

२३. अवसरतुल्यतां समत्वं च लब्धुमुचिता विद्याभ्यासानुसृता पद्धतिः।

४. पठनं स्वाभाविकरीत्या पठितृणां बौद्धिकं, मानसिकं, प्रवर्तनपरं च समग्रविकासं लक्ष्यीकृत्य मस्तिष्क- हृदय- हस्त समन्विता पाठ्यपद्धतिः (Curriculum for the harmony of Head Heart and Hand) इति दर्शनयुक्ता पाठ्यपद्धतिरेव विवक्षते।

एवं चेत् पाठ्यपद्धत्युपगमः कीदृशः? तस्य सैद्धान्तिकः प्रायोगिकाधारः कः भवेत्।

**१.३. पाठ्यपद्धत्युपगमः।**

ज्ञानेन्द्रियाणामुपयोगेन परिस्थितेः पठने नैसर्गिकशेषिभिः सह शिशुः जायते। विश्वं नूतनरीत्या विलोक्य अवगत्य, निर्णयं कर्तुं सामर्थ्यम् एव विद्यालयात् लब्धेन औपचारिकपठनेन प्रापणीया।

स्वस्य पुरतः विद्यमानेषु प्रश्नसन्दर्भेषु भागं स्वीकृत्य प्रश्नपरिहरणप्रक्रियया एव पठनं प्रचलति। पाठ्यपद्धतिविनिमयोपगमस्य विशेषताः काः भवेयुः?

- प्रवर्तनाधिष्ठितः।
- प्रक्रियाबन्धितः।
- पठनदृढीकृतः।
- पठनाधिगमानां फलप्राप्तये पर्याप्तः।
- परिस्थितौ अधिष्ठिता।
- विकासक्षेत्राणां परिगणनात्मकः।
- पठितुः प्रकृतेरनुगुणः।
- पठनेन सहैव मूल्यनिर्णयोऽपि समन्वितः।

ज्ञाननिर्मितिवादे अधिष्ठिता पठनरीतिः पाठ्यपद्धतेः आधारः। पठितृणामार्जितज्ञानस्य आशयस्य च परिगणनया फलप्रदानां पठनप्रवर्तनानां सज्जीकरणेन स्वाभाविकज्ञाननिर्माणं कर्तुं शक्यते इत्येतदेवास्य दर्शनस्य वैशिष्ट्यम्।

**पठनानुभावाः।**

विभिन्नजीवनसाहचर्येभ्यः आगच्छतां पठितृणाम् आर्जितज्ञानं, शेषी तात्पर्यम् इत्यादीनि

विभिन्नानि एव। एतद्वैविध्यं परिगण्य व्यक्तिवैजात्यं तथा बहुमुखबुद्धिं च परिगण्य पठनानुभवानां सज्जीकरणमित्येतदेव प्रधानम्।

**पठनान्तरिक्षम्।**

पठितुः तात्पर्यं विकासं च परिगण्य विविधपठनप्रवर्तनेषु भागं ग्रहीतुं युक्तरीत्या कक्ष्या सज्जीकरणीया। छात्रकेन्द्रीकृतपठनप्रवर्तनानां साहाय्यकरीत्या प्रवर्तनाधिष्ठितपठनं कथं सज्जीकरणीयमिति अस्माभिः प्रत्यभिज्ञातं किल?

**पठनप्रक्रिया।**

- एकैकोऽपि पठिता स्वपूर्वानुभवानां संबन्धेनैन ज्ञाननिर्मितिं करोति। (knowledge construction)
- ज्ञाननिर्माणं, व्यक्तितले समाजतले च अन्तर्भावितम्।
- विविधाः पठनशेषीः (Learning skills) परिगण्य विविधैः इन्द्रियानुभवैः पठनं फलप्रदं भवति।
- सहकरणात्मके संवादात्मके चान्तरिक्षे पठनम् अन्यन्तं फलप्रदं भवति।
- पठनवेगतां परिगण्य पठनानुभवानां दानेन पठनं फलप्रदं भवति।
- पाठ्यवस्तु तात्पर्योत्पादकम् अर्थपूर्णं च भवेत्। तर्हि पठनं फलप्रदं भवति।
- पठनानुभवाः चाक्रिकरीत्या (Spiralling) अवतारयति चेत् पठनं फलप्रदं भवति।
- पठनप्रवर्तनानुगुणम् आयम्यता (Flexibility) अनुरूपीकरणं (Adaptations) पठनप्रवर्तनानां चयनं (selection) इत्यादीनां प्रचालनेन विभिन्नपठनस्य आवश्यकयुक्तान् अभिरुचियुक्तान् च परिगणयेत्।
- पर्याप्तपठनानुभवानां लाभेनैव पठनाधिगमः दृढीकर्तुं शक्यते।
- पठनं, मूल्यनिर्णयश्च उद्ग्रथितरूपेण चालनीये।
- विषयाधिष्ठितानि उद्दानानि (Contents) पठितुः पठनावश्यकताः च परिगण्य अनुगुणानि विविधानि पठनतन्त्राणि बोधनरीतयश्च प्रयुज्यन्ते चेत् पठनाधिगमः प्राप्तुं शक्यते।
- एकैकस्य समग्रविकासं (All round development) लक्ष्यीकृत्यैव पठनप्रक्रिया निश्चेतव्या।

## १.४. पठनाधिगमाः (Learning outcomes)

विविधैः विषयैः सह क्रियमाणानां प्रवर्तनानां फलरूपेण ज्ञानं शेषी, मनोभावाः / मूल्यानि च छात्रे रूपवत्कुर्वन्ति। एषु केचित् ह्रस्वकालेन, केचित् दीर्घकालेन चार्जिताः भवेयुः। एवं छात्रेषु आवश्यकानि परिवर्तनानि पूर्वमेव निश्चेतुं शक्यानि। पाठ्यपद्धतेः आसूत्रणसमये विद्यालयीयविद्याभ्यासरूपेण विविधस्तरेषु छात्रैः प्रापणीयानि लक्ष्याणि एव पठनाधिगमाः इति गण्यन्ते। केषांचन पठनप्रवर्तनानां श्रेणिभिः एकैकस्मात् एककात् प्रापणीयाः पठनाधिगमाः विकासं प्राप्य एकस्याः कक्ष्यायाः अन्ते प्रापणीयपठनाधिगमत्वेन परिणमन्ति। पठनाधिगमानां वैशिष्ट्यं किमिति चेत् ते निरीक्षणविधेयाः (Observable) मापनीयाः (Measurable) चेत्येतदेव। एकैकस्यापि एककस्य कक्ष्यायाः स्तरस्य चान्ते छात्रैः प्रापणीयं ज्ञानं, शेषीः, मूल्यानि, मनोभावाः प्राप्तानि वा इति निर्णेतुं पठनाधिगमानां विशकलनेन साध्यते। पाठ्यपद्धतेः समुचितेन विनिमयेन सर्वेषां छात्राणां पठनाधिगमः दृढीकर्तुं शक्यते।

पठनाधिगमानां विशेषः एवं संग्रहीतुं शक्यते।

यथा -

- विषयाधिष्ठितेन पठनेन पठितृभिः आर्जनीयं ज्ञानं (Knowledge) शेषीः (Skills) मनोभावाः/ मूल्यानि (Attitudes and values) इत्यादीनां समवाय एव भवेत् पठनाधिगमः।
- पठनाधिगमाः निरीक्षणीयाः (Observable) तथा मापनीयाः (Measurable) च भवेयुः।
- ह्रस्वेन दीर्घेण च कालेन आर्जिता भवेयुः पठनाधिगमाः।

## १.५. पठनविभवाः पठनसंविधानानि

पाठ्यपद्धतेः विनिमयाय उपयुक्ताः विविधाः घटका एव पठनविभवाः। पठनप्रक्रियायाः परिपूर्णतायै पठनविभवानाम् उपयोगाः आवश्यकाः।

- पुस्तकालयः
- परीक्षणशाला (गणितम् शास्त्रम् (Maths, Science)
- पठनोपकरणानि
- प्रदर्शनफलकानि

- संगणकयन्त्रपरीक्षणशाला (Computer lab)
- विविधोपयोगसमर्थानि उपकरणानि।
- एतद्विना छात्राणां शेषीः प्रकटयितुं बहवः मञ्चाः विद्यालये सन्ति किल। एते अपि पठनाधिगमान् अधिगन्तुं प्रयोक्तव्याः।
- बालसभा
- विद्यालयसभा
- समितयः
- चर्चामञ्चः
- पठनयात्रा
- सन्नद्धसंघटना (SPC, NSS, Scout, NCC etc)

छात्राणां संपूर्णविकासाय एतादृशघटकाः अत्यन्तम् अपेक्षिताः।

## १.६. संकलितविद्याभ्यासः (Inclusive education)

*विद्यालये उत्कृष्टप्रकटने समर्थस्य सहपाठिनः वासाय गृहं नास्ति, पथि वर्तमानानां नालिकानां मध्ये पाशेन निबद्धानां पटानामधस्तात् एवास्य कुटुम्बः वसति इति च प्रत्यभिज्ञानं छात्राणां मध्ये चर्चाविषयकमभूत्। केवलं मिथः दुःखकथनेन एतद्विषयः न परिह्रीयेत, इत्यवगम्य ते छात्राः अध्यापकानां साहाय्येन समाहृतं द्रव्यमुपयुज्य तस्मै गृहमेकं निर्माय यच्छन्ति।*
*-(विद्यालयानुभवः)*

कक्ष्यायां सर्वेषां समायोजनेन कस्यापि निवर्तनेन विना च पठनाय अन्तरिक्षं कल्पनीयम्। अस्माकं विद्यालयेषु प्रधानतया विभागद्वयस्यापि परिगणनां साहाय्यं, श्रद्धां च दत्वा नीतिपूर्वकः गुणोत्कर्षविद्याभ्यासः (Equitable quality education) कल्पनीयः।

- विशेषश्रद्धायाः पठनसहायस्य परिरक्षायाः आवश्यकता च केषाम्?
- सामाजिकैः आर्थिकैः च कारणैः बहिष्कृताः बालाः बालिकाश्च।
- व्यत्यस्ते विविधे च सामाजिकसांस्कृतिककुटुम्बपश्चात्तले विवेचनमनुभूयमानाः छात्राः।

अतीव दारिद्र्यमनुभूयमानाः गिरिजनाः बालिकाः, अनुसूचितजातिवर्गयुक्ताः देशान्तरगताः, स्थिरतया वासस्थानरहिताः इत्येवं क्लेशमनुभूयमानाः बहवः अन्तर्भवन्ति। परिमितीः वैजात्यानि च विविच्य ज्ञात्वा तान् अङ्गीकुर्यात् तथा बहुमन्येत इति भवेदस्माकं छात्रान् प्रत्युपगमः।

विद्यालये क्रियमाणैः समूहप्रवर्तनैः एतेषां क्लेशाः परिहर्तुं शक्यते।

- शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणाः छात्राः।

शारीरिकमानसिकसमस्याः अभिमुखीक्रियमाणानां पठनप्रयासमनुभवानां च छात्राणां प्रत्येकपठनस्य आवश्यकता अस्ति। (Special educational needs) श्रवणे न्यूनता, दृष्टिपरिमितिः, बौद्धिकपरिमितिः चलनपरिमितिः, पठनन्यूनता, *ओटिस्सं* (Autism), मस्तिष्कविघातः (Cerebral palsy) बहुमुखवैकल्यानि वैकारिकासन्तुलितावस्थायुक्ताः च एषु अन्तर्भवन्ति।

पाठ्यपद्धतेः विनिमयाय के के मार्गाः अस्माभिरनुवर्तनीयाः?

- पठनावश्यकानि, अभिरुचिः इत्येतानि परिगण्य पठनप्रवर्तनासूत्रणम्।
- पठनप्रवर्तनेषु छात्राणां सर्वेषामपि भागभागित्वं लब्धुं पाठासूत्रणस्य अनुरूपीकरणम्।

छात्राणां सर्गशेषीः बुद्धेः विविधतलाञ्च उद्दीपयितुं च समुचितरीत्या सूचनासांकेतिकविद्यायाः (ICT) साध्यताः प्रयोक्तव्याः। अस्याः प्रयोगः जिज्ञासाप्रवर्धकः पठनविषयं प्रति तात्पर्यजनकश्च भवेत्। इन्द्रियपरिमितिमनुभूयमानानां एषा साध्यता अतीव प्रयोजनप्रदा भवेत्। अनेन दृश्यश्राव्यरूपेण विषयान् अनुभववेद्यं कर्तुं शक्यन्ते। व्यत्यस्तपठनशैलीः परिगण्य पठनानुभवान् दातुम् अनया शक्यते।

**अध्यापनसंहिता (Teaching manual)**

पठनाधिगमान् लक्ष्यीकृत्य प्रत्येकम् अध्यापकः सर्गात्मकरीत्या प्रवर्तनानि आसूत्रयितुं प्रभवेत्। पाठपुस्तके अध्यापकमित्रे च दत्तानि प्रवर्तनानि स्वस्य कक्ष्यायाः अनुरूपेण आवश्यकान् अंशान् परियोज्य प्रक्रियापुटम् आयोजनीयम्। एकैकं पठनाधिगमम् आप्तुं सहायकानि प्रवर्तनानि आसूत्रणे अन्तर्भावनीयानि।

- प्रवर्तनेन सह मूल्यनिर्धारणमपि अन्तर्भाव्य एव प्रक्रियापुटं लेखनीयम्।
- निरन्तरमूल्यनिर्णयेन लभ्यमानायाः सूचनायाः अङ्कनमेव प्रतिकरणपुटे आवश्यकम्।

एकस्य सप्ताहस्य कृते सज्जीकृता अध्यापनसंहिता विद्यालयीयप्रकृष्टसङ्घे (SRG)

विषयसमित्यां (Subject Council) च अवतारणीया। एकसप्ताहात्मकस्य प्रतिकरणपुटस्य सूचनाः आधारीकृत्य प्रतिफलनटिप्पणिं लिखित्वा SRG / SC मध्ये अध्यापकैः चर्चा करणीया। अस्याः टिप्पण्याः आधारेण अध्यापकस्य भाविनि आसूत्रणानि युक्तानि भवन्ति। अध्यापनसंहितायाः प्रारूपम् अधोदत्तम्।

| **अध्यापनसंहिता** |
|---|
| पाठस्य नाम -<br>दिनाङ्कः -<br>प्रतीक्षितः समयः -<br>पठनाधिगमः -<br>आशयः -<br>शेषीः -<br>भाषावस्तुताः-<br>व्यहाररूपाणि-<br>मूल्यानि, सामग्र्यः -<br>प्रतीक्षितानि उत्पन्नानि- |

| **प्रक्रियापुटम्** | **निर्धारणपुटम्** |
|---|---|
| प्रवर्तनेन मूल्यनिर्णयेन च युक्ता प्रक्रिया | निर्धारणसूचनाः अत्र लेखनीयाः |

प्रथमाध्यापकस्य हस्ताक्षरम्

अध्यापकस्य / अध्यापिकायाः हस्ताक्षरम्

| **प्रतिफलनात्मिका चिन्ता (Reflection) मम अधिगमः निर्णयश्च** |
|---|
| (पठनप्रवर्तनानां मूल्यनिर्धारणप्रक्रिया द्वारा लब्धानां सूचनानाम् आधारेण।<br>•<br>•<br>•<br>अनुस्यूतप्रवर्तनानि परिहारप्रवर्तनानि।<br>•<br>•<br>• |

प्रतिफलनात्मिका चिन्ता - पूर्वं निश्चितान् पठनाधिगमान् अनुसृत्य निर्वहणं कृतानां प्रवर्तनानां पूर्तीकरणानन्तरमेव प्रतिफलनात्मिकचिन्ता टिप्पणी सज्जीकरणीया।

- पूरिताः टिप्पण्यः प्रतिवारं SRG योगे अवतारणीयाः।
- अनुस्यूतासूत्रणाय दिशाबोधदानम्।
- सत्रस्य निरन्तरमूल्यनिर्णयश्रेणीक्रोडीकरणम्।

# संस्कृतभाषोपगमः।

भारते विविधाः भाषाः सन्ति। तासु भाषासु श्रेष्ठा मातृतुल्य च भवति संस्कृतभाषा। अस्याः भाषायाः पठनेन भारतस्य संस्कृतिं पैतृकं च यथावत् ज्ञातुं शक्यते। २०१४ (चतुर्दशाधिकद्विसहस्रम्) वर्षादारभ्य प्रथमकक्ष्यातः संस्कृतपठनाय केरलीयानां छात्राणां अवकाशः लब्धः इति कार्यं सन्तोषदायकं भवति। अस्माकं मातृभाषायां प्रादेशिकभाषायां च बहूनि संस्कृतपदानि सन्ति इत्यतः केरलीयछात्राणां कृते संस्कृतपठनं सुकरमेव।

आधुनिकेऽस्मिन् भारते बहवः संस्कृतग्रामाः सन्ति। संस्कृतग्रामाणां संख्या वर्धते प्रतिवर्षम्। आधुनिकविषयान् अधिकृत्यापि बहवः ग्रन्थाः संस्कृते प्रतिदिनं जायन्ते। आधुनिकसाङ्केतिकविद्यायामपि संस्कृतभाषायाः स्वाधीनं सुष्ठु वर्तते। अतः संस्कृतपठनस्यावश्यकता अधिकतया वर्तते।

प्राथमिकस्तरे संस्कृतपाठपुस्तकानां रचनासमये पूर्वोक्तानि कार्याणि गणनीयानि भवन्ति। अस्माकं जीविते प्रतिदिनं श्रूयमाणानि संस्कृतपदानि ज्ञातुम् अवगन्तुं वक्तुं च छात्राः शक्ताः भवेयुः। संस्कृते आशयान् व्यक्ततया लेखितुम् अवतारयितुं च छात्राः शक्ताः भवेयुः।

संस्कृते वर्तमानाः वर्धमानाः च बालसाहित्यग्रन्थान् स्वयं पठितुं ज्ञातुम् अस्वदितुं च छात्राः समर्थाः भवेयुः।

अस्मिन् हस्तपुस्तके प्रतिस्तरं छात्रैः आर्जयितुं योग्यानि कार्याणि / उद्देश्यानि पूर्वमेव निश्चितानि सूचितानि च भवन्ति। तानि उद्देश्यानि सफलीकर्तुं योग्यानि प्रवर्तनानि अध्यापकेन कक्ष्यासु उपस्थापनीयानि। पर्याप्तं सन्नाहीकरणम् अध्यापकेन कृतं भवेत्। स्वयमेव पठितुं छात्राः शक्ताः भवेयुः। तदर्थं योग्याः अवसराः देयाः। तान् अवसरान् यथावत् प्रयोक्तुं छात्राः प्रेरितव्याः। एवं चेत् ते सर्गात्मकरचनाः कुर्वन्ति। सर्गात्मिकतया प्रेरिताः ते ज्ञाननिर्माणे व्यापृताः भविष्यन्ति।

लक्ष्येषु प्राधान्यमर्हति संस्कृतं प्रति छात्रेषु प्रीत्युत्पादनम्। तत्कार्ये अध्यापकः श्रद्धावान् भवेत्। इदानीं विद्यार्थिकेन्द्रीकृतकक्ष्यायाः प्राधान्यमेव वर्तते। छात्रेषु सत्क्रियत्वं स्थापनीयम्।

छात्राः सत्क्रियाः भवन्तु। तदर्थं योग्यानि पठनतन्त्राणि कक्ष्यासु प्रयोक्तव्यानि। छात्राणां जीवितेन सह बद्धानि नूतनानि तन्त्राणि प्रयोक्तव्यानि। छात्रान् संस्कृते भाषणाय प्रेरयतु। तदानीं जायमानाः प्रयासाः अध्यापकेन दूरीकरणीयाः। तदर्थमध्यापकेन

१. छात्राणां नैपुणीं ज्ञातुं यत्नः क्रियताम्। यद्यत्र न्यूनताः सन्ति चेत् ताः दूरीकर्तुं यत्नः कार्यः।

२. नैपुणीनां पोषणाय नूतनाः सन्दर्भाः समायोजनीयाः।

३. छात्रेभ्यः नूतनाः अनुभवाः देयाः।

संस्कृतपठनं मातृभाषया प्रदेशिकभाषया च पठनाय सहायकं भवति। बाल्ये अनेकाः भाषाः पठितुं छात्रेषु नैसर्गिकी शक्तिः अधिकतया प्रतिभाति इति विद्याभ्यासविचक्षणाः वदन्ति। अतः संस्कृतपठनेन अधिकं ज्ञानमार्जयितुं शक्यते। भाषासाहित्ये इव संस्कृतसाहित्येऽपि छात्राणां ताल्पर्यं प्रोत्साहनीयम्। छात्राणां रुचिं ताल्पर्यं च ज्ञात्वा अध्यापकेन नूतनः सन्दर्भः कक्ष्यासु आयोजनीयः भवेत्।

भिम्नरुचयः भवन्ति जानाः छात्राः च। तेषां ज्ञानार्जनेऽपि व्यतियानमस्ति। छात्राणां स्वांशीकरणपाटवम् अध्यापकेन ज्ञातं भवेत्। स्थिरे दृढे च ज्ञाने नूतनं ज्ञानम् अधिगन्तव्यम्। अनार्जिते उद्दिष्टे ज्ञाने नूतनं ज्ञानम् उत्पादयितुं न शक्यते। इमं तत्त्वं ज्ञात्वा अध्यापकेन उचितः सन्नाहः कार्यः।

पठनं नाम स्वाभाविकी अनवरता काचन प्रक्रिया भवति। ज्ञाननिर्माणे व्यापृते छात्रे अहं पठामि इति प्रतीतिः कदापि न जायेत। पठनम् आनन्ददायकं भवतु। अतः नैसर्गिकप्रक्रिया इव भाषास्वाधीनशक्तिः संभवतु। भाषाशेषीः आर्जयति, न तु पठति इति प्रतीतिः उत्पादनीया।

भाषां न पठति, किन्तु आर्जयति। स्वयंपठनाय छात्रान् प्रेरयतु। अनुकूले सन्दर्भे छात्राः स्वयमेव पठन्ति। अनेकैः पठनप्रवर्तनैः छात्राः स्वाध्यायाय उत्सुकाः भवेयुः। उत्साही छात्रः वाचयति, लिखति, आस्वादयति, पुस्तकानि पठति च। क्रीडासु तात्पर्यमिव पठनेऽपि तात्पर्यं छात्रेषु उत्पादनीयम्। 'यस्तु क्रियावान् पुरुषः स विद्वान्' इत्यस्ति प्रमाणम्। अनुभवानामाधारे आर्जितस्य ज्ञानस्य मूल्यनिर्णयमपि सः करिष्यति। एवं स्वयं रचनायै सामर्थ्यसम्पादनाय प्रोत्साहनम् अध्यापकेन देयम्।

# मूल्यनिर्णयोपगमः

पठनं नाम छात्रेषु स्वाभाविकतया नैरन्तर्येण च प्रचलन्ती एका मानसिकप्रक्रिया भवति। पठनानुभवाः उद्देश्याधिष्ठिताः तथा पठनाधिगमानाधारीकृत्य च यदि भवेयुः तर्हि पठनमपि कार्यक्षमं भवेत्। छात्रैः स्वायत्तीकरणीयाः शेषीः अवबोधांश्चाधिकृत्य अध्यापकः उद्बुद्धः भवेत्। एकैकस्य पाठभागस्य अधिगमाः (Learning outcomes) विभाव्यैव पठनप्रवर्त्तनानि आसूत्रणीयानि। आसूत्रितानि प्रवर्तनानि जीवितसन्दर्भैः सह योजयित्वा अवतारयितव्यानि।

एवं स्वायत्तीकृताः शेषयः धारणाश्च पठनाधिगमान् प्रबलयितुं कियन्मात्रमुपकुर्वन्ति? पठनाधिगमान् पूर्णतया स्वायत्तीकर्तुं के के छात्राः अवशिष्यन्ते? तेभ्यः देयाः पठनानुभवाः के? ते अनुभावाः कथं देयाः? इत्यादयः चिन्ताः एव अध्यापकं मूल्यनिर्णयप्रक्रियां नयति।

## मूल्यनिर्णयस्य वैविध्यम्।

एकस्य पाठभागस्य/एककस्य विनिमयानन्तरं किमधिगतमिति निर्णेतव्यम्। अस्याः प्रक्रियायाः एव पठनसम्बन्धिमूल्यनिर्णयः (Assessmet of learning) इति नाम। पाठभागस्य पठनानन्तरं पठितुः प्रकर्षः पठनस्य स्तरः इत्यादयः अत्र निर्णीयन्ते। एषा प्रक्रिया मूल्यनिर्णयस्य एकं तलमेव भवति। साधारणतया मूल्य- निर्णयः इत्यनेन एष एवार्थः बहुभिः कल्प्यते। परं स्थूणानिखननन्यायेन पठनस्य दृढीकरणार्थं क्रियमाणस्य मुल्यनिर्णयस्यैव अधिकं प्रामुख्यं कल्पनीयम्। एष एव राज्यान्तरस्तरीयः मूल्यनिर्णयालोकः। पठनसमय एव पठनस्य कार्यक्षमतार्थम् अध्यापकेन, इतरेण, सहपाठिना एव वा क्रियमाणः व्यवहाराः भवेयुः। पठनेन सह एतादृशः मूल्यनिर्धारणः प्रतिक्रियादीनां च मूल्यनिर्णयस्य अपरं तलं भवति। अस्यैव पठनार्थं मूल्यनिर्णयः (Assessment for learning) इति नाम। एषः पठनपुरोगत्यै निरन्तरं निर्वहणीयः भवति तथा पठनप्रवर्तनेन सह ओतप्रोतः च भवति।

पठनेन स्वायत्तीकृतान् आशयान् धारणांश्च स्वयंविमर्शनात्मकतया निरीक्षणं, परिणतीनाम् अवगमञ्च निरीक्ष्य एका शोधकप्रक्रिया अप्यस्ति। अस्यैव स्वयंमूल्यनिर्णय इति वदामः। एवं स्वयं मूल्यनिर्णयेनापि पठनं साध्यं भवति। अस्यैव मूल्यनिर्णय एव पठनम् (Assessment as learning) इति नाम। पठनम् अधिकं कार्यक्षमतया निर्वहणीयं चेत् पठनार्थं मूल्यनिर्णयः, मूल्यनिर्णयः एव पठनम् इत्येतयोः अधिकं प्रामुख्यं कल्पनीयम्। एवं रीत्या पठनं फलप्रदं कर्तुं

मूल्यनिर्णयप्रक्रियायाः प्रामुख्यदायकः उपगमः एव अस्माभिः स्वीकरणीयः भवति।

**मूल्यनिर्णयोपगमः।**

पठनाधिगमान् दृढीकर्तुमुद्यतः पठनोपगमः स्वीकर्तव्यः अस्ति। अतः पठनाधिगमानां दृढीकरणात्मकः मूल्यनिर्णयोपगमः (Outcome focused assessment) एव स्वीकर्तव्यः। पठनाधिगमान् आधारीकृत्य क्रियमाणेषु पठनप्रवर्त्तनेषु पठितुः सजीवसहभागता ध्रुवं भवति। विमर्शनात्मिका चिन्ता पठनस्य प्रतिफलनं प्रकटनञ्च मिथः बन्धितं ज्ञानम् इत्येतानि एव पठनाधिगमानाधारीकृतस्य पठनस्य विशेषताः।

**मूल्यनिर्णयनैरन्तर्यं समग्रता च। (CCE)**

विद्यालयस्तरे निरन्तरं समग्रं च मूल्यनिर्णयं निर्दिशति। पठनं नाम छात्रेषु अनुस्यूतं वर्तमाना प्रक्रिया। अत एव मूल्यनिर्धारणप्रक्रिया च अनुस्यूतं भवेत्। छात्राणां वैज्ञानिकः सामाजिकः वैकारिकश्च विकास एव समग्रविकासः इत्यनेन बुध्यते। मूल्यनिर्धारणप्रक्रियायाः समग्रता तथा अनुस्यूतता च दृढयितुं समग्रः तथा निरन्तरमूल्यनिर्णये (CCE) प्रधानतया क्षेत्रद्वयं परिगणनीयम्।

**CCE क्षेत्रम् ।**

१. वैज्ञानिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

२. सामाजिक-वैकारिकक्षेत्रे विकासात्मकः मूल्यनिर्णयः।

**एतयोः विशदांशाः।**

१. वैज्ञानिकक्षेत्रविकासात्मकः मूल्यनिर्णयः। (प्राथमिकस्तरः)

छात्रेण पठनीया सर्वे विषया वैज्ञानिकक्षेत्रे अन्तर्भवन्ति। भाषा-शास्त्र-गणित-समाजशास्त्र-कला-प्रवृत्ति आरोग्य-कायिकपठनानि अस्मिन् अन्तर्भवन्ति एकैकस्मिन् विषये पठनाधिगमान् अवगम्य कियत्परिमितं स्वायत्तीकृतमिति निर्धारणं करणीयम्। अत्र द्विविधः मूल्यनिर्णयः निर्दिष्टः।

१. निरन्तरमूल्यनिर्णयः (CE)

२. सत्रान्तमूल्यनिर्णयः (TE)

## निरन्तरमूल्यनिर्णयः ।

प्राथमिकस्तरे भाषाविषयाणां पठनम् अनेकासां शेषीनामार्जनाय प्रचलति। परम् अस्मिन् पठने आशयाः वस्तुताः विविधानि वैज्ञानिकक्षेत्राणि सृजनात्मकरचनाः इत्यादीनि वैविध्यपराणि उद्दानानि सन्ति। एतानि विहाय भाषाशेषिनिर्णयः दुष्करः भवति। श्रुत्वा पठित्वा च कार्यग्रहणं, कथित्वा लिखित्वा च प्रकटनं, सर्गात्मकरचनानिर्वहणम् इत्यदीनि भाषापठनेन प्रवर्धयन्ति। अतः भाषापठनस्य केवलशेषिः अथवा विज्ञानसम्पादनम् इति रूपेण पृथक्करणम् असाध्यं भवति।

प्रथमद्वितीयकक्ष्ययोः विषयवस्तूनि (themes) आधारीकृत्यैव भाषा, परिस्थितिपठनं, गणितम् इत्यादिषु विषयेषु प्रवर्त्तनानि आयोजितानि। अतः अनयोः कक्ष्ययोः उद्दानक्षेत्ररूपेण उपयुक्तानि विषयवस्तूनि प्रदिशामः। वाचिकानां लिखितानाञ्च शेषीनां विकासे प्राथमिकस्तरीयाः भवन्ति छात्राः इत्यतः उचितः आलेखनक्रमः स्फुटवाचनं श्रवणं, भाषणं, लेखनम् इत्यादिषु प्रवर्धनं लिपिविन्यासविशेष इत्यादीनि भाषानैपुणीनां प्राथमिकस्तरत्वेन परिगणनीयानि।

शास्त्रविषयेषु आशयरूपीकरणस्य एकैकस्मिन् स्तरे अर्पिताः आशयधारणाः स्वायत्तीकृताः नैपुण्यः च परिगणनीयाः।

अत्र निरन्तरमूल्यनिर्णयः त्रिविधः निर्दिष्टः।

- प्रक्रियायाः मूल्यनिर्णयः।
- सञ्चितपुटानां मूल्यनिर्णयः। (Port folio)
- एककस्तरमूल्यनिर्णयः (एकैकस्मिन् एकके साकल्येन पठनाधिगमानां मूल्यनिर्णयः।)

एते विशदीक्रियन्ते।

## प्रक्रियायाः मूल्यनिर्णयः

पठननिर्वहणसमये प्रक्रियायाः मूल्यनिर्णयं प्राधान्यमर्हति। पठनप्रक्रियायाः अङ्गीभूतानि सर्वाणि प्रवर्तनानि निर्धारणीयानि । तद्वत् अवश्यं साहाय्यमपि करणीयम्। प्रत्येकस्मिन् आशयरूपवत्करणस्तरे छात्रस्य आशयधारणाः तेन स्वायत्तीकरणीयाः शेषीः च निर्धारयितव्याः। एककानां प्रकृतिमनुसृत्य स्वयंमूल्यनिर्णयस्य पारस्परिक मूल्यनिर्णयस्य अध्यापकमूल्यनिर्णयस्य

च सूचकानि सम्पाद्य उपयोक्तुं शक्यते। प्रक्रियायाः मूल्यनिर्णयार्थम् अधोदत्तानि सूचकानि उपयोक्तव्यानि।

१. प्रवर्त्तनेषु भागभागित्वम्।

२. आशयधारणा।

३. नैपुणीनाम् आर्जनम्।

४. प्रकटनम् / अवतारणम्।

५. प्रमाणीकरणम् / सज्जीकरणम्।

सामाजिकवैकरिकक्षेत्रेषु नैपुणीनां मूल्यनिर्धारणमपि प्रक्रियायाः मूल्यनिर्णयस्य भागत्वेन सञ्चालयितव्यम्। प्रक्रियायाः वैशिष्ट्यं निर्धार्य अङ्कदानार्थं सामाजिकवैकारिकक्षेत्रेषु आर्जिताः नैपुणीः परिगणनीयाः। तदर्थम् उपयुक्तेषु पञ्चसूचकेषु विविधानां नैपुण्यः विकासः कियन्मात्रम् इति निर्धारणं पर्याप्तं भवेत्।

| **सूचकाः** | **नैपुण्यः** |
|---|---|
| प्रवर्तनेषु भागभागित्वम् | स्वयम् अवगमनम्, नेतृत्वेशेषिः,<br>व्यक्त्यन्तरनैपुणी, उत्तरवादित्वबोधः |
| आशयः/धारणा | पठननैपुण्यः |
| शेषीनामार्जनम् | निर्णयस्वीकारः प्रश्नपरिहारशेषिः,<br>सर्गात्मकशेषिः |
| प्रकटनम् / अवतारणम् | आशयविनिनयशेषिः |
| प्रमाणीकरणम् / सज्जीकरणम् | विमर्शनात्मिका चिन्ता |

प्रक्रियामूल्यनिर्णयस्य सूचकानामाधारेण तानि निर्धार्य अध्यपकस्य निर्धारणपुटे पठनप्रवर्तनानामायोजनसमय एव आवश्यकं प्रामाणीकरणं कर्तव्यम्। छात्राणां टिप्पणिपुस्तिका प्रक्रियामूल्यनिर्णयार्थं पठनरेखारूपेण उपयोक्तव्या। सत्रान्ते अङ्कत्वेन परिवर्त्य तदर्थं निश्चिते प्रारूपे (format) योजनीयम्।

## सञ्चितपुटानां मूल्यनिर्धारणम्।

पठनमधिकृत्य छात्रेभ्यः रक्षितृभ्यः, अध्यापकेभ्यश्च प्रतिक्रियादानम् (feed back) एव सञ्चितपुटस्य धर्मः। प्रक्रियेयं पठनं त्वरितं करोति। पठनप्रवर्त्तनेषु व्यापृते सति मूर्तमापन्नानि सर्वाणि उत्पन्नानि सञ्चितपुटे अन्तर्भाव्य निर्धारणीयानि। विषयबन्धिता पठनरेखा अस्मिन्नन्तर्भवति। (मम कथापुस्तकम्, मम शब्दकोशः च)

सञ्चितपुटानाम् उदाहरणानि अधः प्रदत्तानि।

- टिप्पणिपुस्तिका
- इतराः रचनाः (वैयक्तिकरचनाः, सांस्कृतिकरचनाः)
- इतराः पठनरेखाः (चित्राणि, समाहरणानि)
- पठनरेखानिर्धारणार्थं छात्रैः रूपवत्कृता सूचकाः।
- सर्गात्मकरचना।
- प्रवृत्तिपुटानि। (work sheets)
- एककनिर्धारणरेखाः।
- सञ्चितपुटनिर्धारणार्थम् अधोदत्तानि सूचकानि उपयोक्तुं शक्यन्ते।
- आशयव्यक्तता अनुयोज्यता च।
- धारणानां स्वांशीकरणम्।
- तन्मयतया अवतारणम्।
- समग्रता।
- प्रामाणीकरणस्य अनुस्यूतता।

प्रक्रियानिर्धारणं सञ्चितपुटनिर्धारणम् इत्येतेषु प्रत्येकं सूचकम् अतिप्रकृष्टम् / प्रकृष्टम्/ माध्यम् / प्रकर्षणीयम् इत्येवं मानं कृत्वा यथाक्रमं ४ / ३ / २ / १ इति अङ्का गणनीयाः। पठनप्रक्रियायां पठितुः प्रकटनं मूर्तीकृतानि उत्पन्नानि इत्येतानि निर्धारयितुम् अध्यापनसंहिता (Teaching manual) पठितुः टिप्पणीपुस्तिका इत्यादीनाम् उद्ग्रानानि उपयोक्तुम् अध्यापकः प्रभवति।

## १. पाठासूत्रणरेखायाः परामर्शानां विशदांशाः।

पठनानुभवान् सूक्ष्मतले आसूत्रयितुं निरन्तरमूल्यनिर्णयं शास्त्रीयतां कर्तुं च पाठासूत्रणं करणीयम्। तदर्थं अध्यापनसंहितायाः (Teaching manual) स्वरूपं परिष्करणीयमस्ति। अध्यापनसंहारेषु अधोदत्ताः घटकाः अन्तर्भावयितव्याः।

- पठनाधिगमाः
- आशयः / धारणाः
- शेषिः
- मूल्यानि / मानोभावः
- पठनसामग्र्यः।
- प्रतीक्षितानि उत्पन्नानि
- समयः
- प्रवर्तनमूल्यनिर्णययुक्तः प्रक्रियापुटः, निर्धारणांशप्रतिपादितः निर्धारणपुटश्च।
- निर्धारणपुटस्य अंशान् आधारीकृत्य भावनाटिप्पणी, छायाटिप्पणी।

## २. विषयबन्धितटिप्पणिपुस्तिकासम्बन्धिनः विशदांशाः।

वैज्ञानिकक्षेत्रस्य मूल्यनिर्णयार्थम् उपयोक्तव्यं मुख्यं प्रमाणमस्ति पठितुः टिप्पणिपुस्तिका। प्रथमद्वितीयकक्ष्यासु पठनप्रक्रियामनुसृत्य विविधानां प्रवर्तनानां पूर्तीकरणाय टिप्पणीपुस्तिका सहायिका भवति। टिप्पणीपुस्तिकाद्वारा पठनाधिगमान् प्राप्तुमवसरं छात्राः लभन्ते। प्रथमद्वितीयकक्ष्यायां छात्राः कियन्मात्रं पठनाधिगमान् सम्पादितवन्तः इति निर्धारयितुमपि टिप्पणीपुस्तिका सहायिका भवति।

तृतीयतः पञ्चमीकक्ष्यापर्यन्तं कक्ष्यासु पठनं कार्यक्षमं कर्तुं विषयबन्धिता टिप्पणिपुस्तिका आवश्यकी भवति। तद्वारा पाठपुस्तकस्थानां प्रवर्तनानाम् अतिग्रहणेन छात्राः पठनाधिगमान् सम्पादयन्तीति निर्णेतुम् अध्यापकः प्रभवति। अत एव तृतीयचतुर्थपञ्चमकक्ष्यासु विषयबन्धिताः टिप्पणिपुस्तिकाः निर्धारणार्थं परिगणनीयाः। षष्ठी सप्तमी अष्टमी कक्ष्यायाः कृते विषयबन्धितानि

टिप्पणिपुस्तकानि आवश्यकानि। पठितुः सर्गात्मकता, चिन्ताप्रक्रिया, भाषानैपुणी इत्याद्याः टिप्पणीपुस्तके प्रतिफलनीयाः भवन्ति। पाठभागस्य विनिमयाय आयोजितानि तन्त्राणि तेषां पूर्तीकरणार्थं पठितुः सन्नद्धता, प्रवर्तनपुटानां विविधस्तरेषु सान्निध्यम् इत्याद्याः सर्वाः सूचनाः टिप्पणीपुस्तके भवेयुः। प्रवर्त्तनद्वारा मूर्तीकृतानि उत्पन्नानि अधिकृत्य विशदांशाः अपि अस्मिन् पुस्तके एव प्रमाणीकरणीयाः।

अध्यापिका अधिगमान् यथासमयं निर्धार्य पठनपुरोगत्यै आवश्यकः निर्देशः साहाय्यं च दद्यात्। अध्यायस्यावसाने तत्सम्बन्धिनः अधिगमान् पठिता कियन्मात्रं स्वायत्तीकृतवानिति निर्धारणार्थमपि प्रमाणत्वेन टिप्पणीपुस्तकं परिगणनीयम्। आशयव्यक्तं सन्दर्भानामाशयानां चानुयोज्यं परामर्शसहितं स्वकीयचिन्ताप्रतिफलकं स्वांशीकृतं च भवेत् टिप्पणीपुस्तकम्। कार्याणि तन्मयतया अवतारणीयानि। आशयस्य चिन्तायाश्च समग्रतया आविष्कारः अनुस्यूतः परस्परबन्धितश्च परामर्शः इत्यादीनां प्रतिफलनात्मकं भवेत् टिप्पणीपुस्तकस्य प्रमाणीकरणाम्।

**एककस्यमूल्यनिर्णयः।**

विविधान् पठनाधिगमान् परस्परबन्धेन विन्यस्यमानः घटकः भवति एककम्। अस्यैका समग्रा प्रकृतिरस्ति। एकस्य एककस्य निर्धारणेन एकां समग्रां प्रकृतिमेव निर्धारयति। वाचिकः मूल्यनिर्णयः प्रश्नोत्तरं विवृतपुस्तकमूल्यनिर्णयः प्रश्नसज्जीकरणम् उत्तरसूचिकावगमनं, नूतनी रचना, निर्धारणम् इत्यादीनि लिखितमूल्यनिर्णयेन सह परिगणनीयानि। निश्चिते एकके पठानाधिगमानां विषये छात्राः कुत्र तिष्ठन्ति इत्यवगन्तुं सहायकाः मानमापकाः उपयोक्तव्याः। एककस्य मूल्यनिर्णयार्थं सूचितानाम् आधारेण अङ्कान् दत्वा सत्रान्ते निश्चितरूपरेखायां प्रामाणीकरणीयम्। एकस्मिन् सत्रे एकाधिकम् एककस्य मूल्यं निर्धारणीयम् इत्यतः एककमूल्यनिर्णयस्य माध्यमेव (AVERAGE) सत्रान्ते योजनीयम्। अत्रोपयुक्तस्य उपकरणस्य प्रकृत्यनुसारीणि सूचकानि अध्यापकेन आयोजनीयानि। एवम् आयोजनावसरे पठनाधिगमः कियन्मात्रं स्वायत्तीकृतः इत्यस्य प्रामुख्यं देयम्। त्रयाणाम् एषां मूल्यनिर्णयानाम् अङ्कस्यानुपातिकतय श्रेणीः दत्वा एव छात्राणां निरन्तरमूल्यनिर्णय श्रेण्याः परिगणनाः। कलापठनम्, प्रवृत्तिपठनम्, आरोग्यकायिकविद्याभ्यास इत्येतेषां विषयाणामपि एवं रीत्या श्रेणी देया।

## निरन्तरमूल्यनिर्णयश्रेण्याः रीतिः।

प्रत्येकं विषयस्य प्रक्रिया, सञ्चितपुटम्, एककतलमूल्यनिर्णयः इत्येतेषु एकैकस्य अङ्काः दशांशत्वेनावगत्य तेषां योगनिर्णयः कार्यः। अस्यानुपातिकी श्रेणी अधोदत्तां पट्टिकामुपयुज्य अवगन्तव्या।

| अङ्कः | शतमानम् | श्रेणी |
|---|---|---|
| ३० | | |
| २३-३० | ७५-१०० | A |
| १८-२२ | ६०-७४ | B |
| १४-१७ | ४५-५९ | C |
| १०-१३ | ३३-४४ | D |
| दशतः न्यूनम् | ३३ तः न्यूनम् | E |

उदाहरणार्थं यस्य छात्रस्य संस्कृतभाषायाः प्रक्रिया, सञ्चितपुटः एककमूल्यनिर्णयः इत्येतेषाम् अङ्काः यथाक्रमं ८, ७, ७, इति चिन्तयन्तु, तर्हि योगः ८ + ७ + ७ = २२ भवति। पट्टिकानुसारं संस्कृतस्य निरन्तरमूल्यनिर्णयश्रेणी B भवति।

## सत्रान्तमूल्यनिर्णयः (TE)

प्राथमिकस्तरे भाषाविषयाणां सत्रे परिगणितानाम् एककानां पठनाधिगमान् आधारीकृत्य व्यवहाररूपाणि भाषावस्तुताः भाषाशेषीः इत्येतानि क्षेत्राणि परिगण्यैव सत्रे मूल्यनिर्णयः भवेत्। उद्ग्रानक्षेत्रस्य नैपुण्याश्च प्रामुख्यं दत्वा विविधानि प्रश्नरूपाणि अत्रायोजनीयानि। शास्त्रविषयाणां सत्रे परिगण्यमानानाम् एककानाम् उद्ग्रानक्षेत्राणि आधारीकृत्य पठनाधिगमस्य प्रामुख्यदायकानि आशयनैपुण्यादीनि मापयितुं पर्याप्तान् प्रश्नान् सज्जीकृत्य सत्रान्तमूल्यनिर्णयः करणीयः। प्रत्येकम् एककस्य / आशयक्षेत्रस्य अनुयोज्यं प्रामुख्यं दत्वा विविधेषु तलेषु मानसिकप्रक्रियाणाम् (ज्ञानम्, अपग्रथनम्, निगमनम्, प्रयोगः) अनुरूपं प्रामुख्यं दत्त्वा च एकं परिनिष्ठापत्रं (Blue Print) सज्जीकृत्य विविधान् प्रश्नान् अत्र सन्तीति निर्णीयैव प्रश्नपत्राणि सज्जीकरणीयानि। प्रश्नानाम् अनुयोज्यानि सूचकानि आयोजनीयानि। तदनुसारेण मूल्यनिर्णयः निर्वहणीयः।

कलापठनम्, प्रवृत्तिपठनम्, आरोग्यविद्याभ्यासः इत्येतेषां विषयाणां सत्रान्तमूल्यनिर्णयः, प्रकटनमूल्यनिर्णयरूपेण (Performace assessment) निर्वहणीयः। तेषां सहाय्यकरूपाणि हस्तपुस्तके दत्तानि।

## मूल्यनिर्णयार्थं विविधानि प्रारूपाणि (format)

प्राथमिकस्तरे कक्ष्याशिक्षकरीतिरेव अस्माकं राज्ये प्रचलति स्म। अतः कक्ष्याशिक्षकस्य प्रमाणीकरणम् अतीवक्लिष्टं भवति। (F1) प्रारूपम् एकस्मिन् सत्रे एकवारं प्रमाणीकृत्य निरन्तरमूल्यनिर्णयश्रेणी सत्रान्तमूल्यनिर्णयश्रेणी च अस्मात् प्रारूपात् वार्षिकक्रोडीकरणप्रारूपे (F3) परिवर्त्य प्रमाणीकर्तुं शक्यते। परन्तु विषयकेन्द्रीकृतरूपेण यदि कक्ष्या सञ्चाल्यते तर्हि (F2) प्रारूपे प्रमाणीकृत्य वार्षिकक्रोडीकरणप्रारूपे (F4) परिवर्त्य योजनीयम्। प्राथमिकस्तरे मलयालं विहाय अन्यभाषाध्यापकाः विषयकेन्द्रीकृतप्रारूपम् उपयुज्य प्रमाणीकुर्वन्तु। प्रतिसत्रं समानानि प्रारूपाणि उपयोक्तुं शक्यन्ते।

## श्रेणीकरणप्रणाली ।

प्रथमतः सप्तमीपर्यन्तं कक्ष्यासु निरन्तरमूल्यनिर्णयस्य श्रेणीकरणप्रणाली एव अधुना प्रचाल्यते। सा प्रणाली पुनरपि प्रथमतः अष्टमीपर्यन्तं कक्ष्यासु अनुवर्तनीया। अतः निरन्तरमूल्यनिर्णयस्य त्रयाणामपि विभागानां अङ्कान् अवगत्य तस्य योगस्य आनुपातिकं श्रेणीकरणं पर्याप्तं भवेत्। प्रत्येकं विषयस्य निरन्तरमूल्यनिर्णयः सत्रान्तमूल्यनिर्णयः इत्येतयोः प्रत्येकं श्रेणीकरणाय अधोदत्ता पञ्चबिन्दुमापिका उपयोक्तव्या।

| अङ्काः / शतांशः | श्रेणी |
|---|---|
| ७५-१०० | A |
| ६०-७४ | B |
| ४५-५९ | C |
| ३३-४४ | D |
| ३३तः अधः | E |

## मूल्यनिर्णयः - वार्षिकक्रोडीकरणं (प्राथमिकस्तरः)

सत्रत्रयेऽपि छात्रेण सम्पादिताः प्रकृष्टाः श्रेणीः/अङ्काः एव निरन्तरमूल्यनिर्णयस्य समग्रा श्रेणी। प्रथमे सत्रे यदि एकः न्यूनश्रेणीं लभेत परं पठने पुरोगतिं प्राप्ते निरन्तरमूल्यनिर्णये

प्रकर्षं स्वायत्तीकरोति तस्य कृते प्रयोजकः भवतु इति सङ्कल्पेन एव एवं निर्वहति। किन्तु एवं श्रेण्यः वर्धिताः इति निरीक्षणं शक्तं कर्तव्यम्।

प्रतिविषयं CE समग्रश्रेणी CE पट्टिकायां TE श्रेणी TE पट्टिकायां च प्रमाणीकरणीयम्। सामजिक वैकारिकक्षेत्राणां मूल्यनिर्णयः प्रत्येकं पट्टिकायम् अङ्कनीयः। छात्रेषु प्रकृष्टा नैपुणी वार्षिकक्रोडीकरण- प्रारूपे अङ्कनीया।

## सामाजिक-वैकारिकक्षेत्राणां मूल्यनिर्णयः (प्राथमिकस्तरम्)

वैज्ञानिकक्षेत्रस्येव सुप्रधानं भवति सामाजिकवैकारिकक्षेत्राणां मूल्याङ्कनम्। सङ्घरूपेण जीवितुं (Learning to live together) वैयक्तिकप्रकर्षं सम्पादयितुं (Learning to be) च युक्ता नैपुणी अत्र परिगणनीया। अपि च पठनशैलीः तन्त्राणि चान्तर्भूता पठननैपुणीसमार्जनं च अस्य क्षेत्रस्य भागत्वेन निर्णेतव्यम्। सामाजिकवैकारिक क्षेत्राणां मूल्यनिर्णयसम्बन्धिन्यः नैपुण्यः अधः प्रदत्ताः ताः एव निर्णेतव्याः।

१. आशयविनिमयशेषिः (communication skill)

२. स्वयं बोधः (self management skill)

३. नेतृत्वशेषिः (leadership skill)

४. व्यक्त्यन्तरनैपुणी (interpersonal skill)

५. निर्णयस्वीकारः (decision making skill))

६. उत्तरवादित्वबोधः (sense of responsibility)

७. विमर्शनात्मिका चिन्ता (critical thining skill)

८. सर्गात्मकशेषिः (creative thinking skill)

९. प्रश्नपरिहारशेषिः (Problem solving skill)

१०. पठननैपुण्यः (study skills)

एतासां मूल्यनिर्णयः छात्रस्य सामाजिक-वैकारिकविकसनं प्रबलीकर्तुं सहाय्यकं भवेत्। वैज्ञानिकक्षेत्रे विषयान् पाठयन्तः अध्यापकाः एव एषां मूल्यनिर्णयमपि कुर्युः। एकैकस्य विषयस्य प्रक्रियायाः निर्धारणस्य भागत्वेन अयं मूल्यनिर्णयः अपि करणीयः। अत्र प्रवर्तनेषु भागभागित्वम् इति सूचकम् उपयुज्य मूल्यनिर्णयस्य भागत्वेन स्वयं ज्ञातं नेतृत्वशेषिः व्यक्त्यन्तरनैपुणी,

उत्तरवादित्वबोधः इत्यादीन्यपि निर्णेतव्यानि। आशयधारणा इति सूचकमुपयुज्य मूल्याङ्कनस्य भागत्वेन पठननैपुणी अपि निर्णेया। शेषीनामार्जनम् इति सूचकेन सह निर्णयस्वीकारः प्रश्नपरिहरणशेषिः सर्गात्मकशेषिः इत्याद्याः निर्णेतव्याः। अवतारणं प्रकटनम् इति सूचकमुपयुज्य निर्णयेन सह आशयविनिमयशेषिः निर्णेतव्या। प्रमाणीकरणं / सज्जीकरणम् इति सूचकमुपयुज्य विमर्शनात्मिका चिन्ता निर्णेतव्या।

सामाजिकवैकारिकक्षेत्रे पठितुः उत्कर्षसम्बन्धीनि कार्याणि अवगत्यप्रमाणीकरणार्थं श्रद्धा देया। प्रतिलोमपरामर्शलेखनार्थं नैव निर्दिशति। प्रत्येकं पठितुः गुणपरा नैपुणी प्रोत्साहनीया। तदधिकृत्य प्रमाणीकरणम् अध्यापनसहितायां करणीयम्। अयं मूल्यनिर्णयः प्रत्येकं पट्टिकायां गुणात्मकतया वार्षिकक्रोडीकरणप्रारूपे अङ्कनीयः। तदर्थं प्रारूपे प्रत्येकं पङ्क्तिः योजिता। पठितुः पुरोगतिपत्रेऽपि एतत्सम्बन्धिप्रमाणीकरणाय अवकाशः देयः। ■

## अध्यापकमित्रं नाम किम्? किमर्थम्?

अधिकाराधिष्ठितविद्याभ्यासः इति लक्ष्यं सम्पादयितुं छात्राणं सर्वतोमुखविकासाय अयोजिता इयं परिष्कृता पाठ्यपद्धतिः। एतदनुसारं पठनप्रवर्तनस्य आसूत्रणे निर्वहणे च सामर्थ्यसम्पादनाय मूल्यनिर्णयप्रवर्तनानाम् आसूत्रणे निर्वहणे अध्यापकान् शक्तान् कर्तुं साहाय्यं भवति इदम् अध्यापकमित्रम्।

अस्मिन् पुस्तके पठनाधिगमाः पठनप्रवर्तनानि मूल्यनिर्णयोपाधयः अधिकवाचनांशः प्रवर्तनपुटानि इत्यादीनि कार्याणि अन्तर्भवन्ति। अधिकपठनाय साध्यतायाः उपयोगक्रमः पाठासूत्रणानि वार्षिकासूत्रणं च अस्मिन् आयोजितम्। पठनाधिगमानां प्राप्त्यर्थं यानि यानि प्रवर्तनानि आवश्यकानि तानि सर्वाणि सफलीकर्तुं स्वातन्त्र्यम् अध्यापकानाम् अस्ति।

प्रत्येकम् अध्यापकः, पूर्वोक्तरीत्या छात्राणां पठनं सफलम् कर्तुं यतताम्। तदर्थं अध्यापकमित्रं सप्रयोजकं भूयाद्।

# वार्षिकासूत्रणम्

| सत्रं | मासः | पाठः | अनुबन्धप्रवर्तनानि |
|---|---|---|---|
| पादवार्षिकमूल्यनिर्णयः | **जूण्** | 1.वन्दे केरलजननीम्। | बालगीतं सतालमालपति।<br>आशयं वदति लिखति च।, देशमहत्वं वदति लिखति च। |
| | **जूलय्** | 2. अन्नम् अमृतम्।<br><br>3.दीपावलिः। | संभाषणपरिशीलनम्।, भक्ष्यवस्तूनां नामपरिचायनम्।, संस्कृतपदस्वाधीनता।<br>विवरणं पठित्वा आशयग्रहणम्। |
| | **आगस्ट्** | 3. दीपावलिः (अनुवर्तते)<br><br>4. श्रीनारायणगुरुदेवः | उत्सवानां महत्वं जानाति।, ऐतिह्यकथाः जानाति।, सम्भाषणे तात्पर्योत्पादनम्।<br>आशयग्रहणम्। |
| अर्धवार्षिकमूल्यनिर्णयः | **सेप्तम्बर्** | श्रीनारायणगुरुदेवः (अनुवर्तते)<br>5. द्विचक्रिकायाः दुःखम् | चित्राणि दृष्ट्वा लघुवाक्यानि वदति। जीवनचरितं पठति।<br>वाहनानां नामानि वदति।, आत्मकथाकथने तात्पर्यम्।, आत्मकथायाः वैशिष्ट्यम्। |
| | **ओक्टोबर्** | द्विचक्रिकायाः दुःखम् (अनुवर्तते) | द्विचक्रिकायाः विशेषताज्ञानम्।<br>वाहननामानि संस्कृते वदति।, वाहनानां वर्गीकरणम्। |
| | | 6. सूर्योदयः | प्रकृतेः सौन्दर्यानुभूतिः।, प्रकृतिपरिचायनम्।, गीतालपनं करोति। |
| | | सूर्योदयः। (अनुवर्तते)<br>7. राधिकायाः एकं दिनम्। | कवितायाः आशयग्रहणम्।<br>पर्यायानां ग्रहणम्। (सूर्यस्य)<br>दिनचर्यालेखनम्।, वासराणां नामग्रहणम्। संख्यानां पठनम्। |
| | **डिसम्बर्** | 8. सुभाषितानि | सुभाषितास्वादनम्।, सच्छीलरूपीकरणम्।, गीतालपनम्। |
| वार्षिकमूल्यनिर्णयः | **जनुवरि** | सुभाषितानि (अनुवर्तते)<br>9. कृषकस्य कौशलम् | आशयग्रहणम्।<br><br>कथास्वादनम्।, कथाकथनतात्पर्यम्। कथावाचनोत्सुकता। |
| | **फेब्रुवरि** | कृषकस्य कौशलम् (अनुवर्तते)<br>10. गीतामृतम्। | कथाविषये चर्चा।<br>श्लोकानामालपनम्।, श्लोकाशयग्रहणम्।, श्लोकचयनम्। |
| | **मार्च्** | 11. नष्टमनोरथः<br>पाठानाम् आवर्तनम् | कथाश्रवणे कौतुकोत्पादनम्।<br>कथांशानांग्रहणम्।, आशयावगतिः। |

# प्रथमम् एककम्

**उत्सवः आनन्ददायकः भवति।**

**उत्सवाः के?**

**तदा जनाः किं कुर्वन्ति?**

**एककमिदं पठतु।**

## पठनाधिगमाः

* बालकवितां सतालं गायति।
* कवितायाः आशयं वदति लिखति च।
* देशीयतामधिकृत्य वदति लिखति च।
* सन्दर्भानुसारं सम्भाषणं करोति।
* भोज्यवस्तूनां संस्कृतनामानि वदति लिखति च।
* विवरणं पठित्वा आशयं वदति।
* उत्सवानां प्राधान्यम् अधिकृत्य वदति।

### प्रथमः पाठः

# वन्दे केरलजननीम्।

**आमुखम्**

केरलानधिकृत्य रचितमेकं देशभक्तिगीतमिदम्। अस्मिन् केरलानां प्रकृतिभङ्गिं विभवसमृद्धिं जनानां प्रबुद्धताञ्च उपवर्णयति। संघशः एकैकशश्च बहुवारं गीतालपनं कृत्वा आस्वादनमेव पाठेऽस्मिन् प्रमुखं प्रवर्तनम्। गीतालपनेन आशयग्रहणेन च स्वदेशं प्रति छात्राणाम् आभिमुख्यं अभिमानञ्च समुपजायेत।

**पाठस्य नाम** - वन्दे केरलजननीम्।

**कालांशाः** - **16**

**उद्देश्यम्** - संघशः एकैकशश्च गीतालपनेन काव्यास्वादनम्।
गीतस्य आशयग्रहणम्।
स्वदेशभक्तिवर्धनम्।

**नैपुणी** - गीतालपनसामर्थ्यम्।
आस्वादनक्षमता।
आशयग्रहणम्।

| **आशयः/धारणाः / व्यवहाररूपाणि।** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः।** |
|---|---|---|
| देशभक्तिगीतम्।<br>केरलानां भूप्रकृतिः, विभवसमृद्धिः<br>केरलीयानां प्रबुद्धता च। | गीतश्रवणम्।<br>संघशः एकैकशश्च गीतालपनम्।<br>आशयग्रहणम्।<br>गीतस्य आशयमधिकृत्य चर्चा। | देशभक्तिगीतपरिचयं सम्पादयति। गीतस्य आशयं गृह्णाति। आशयमधिकृत्य चर्चां करोति। स्वदेशाभिमानं वर्धते।आस्वादनपरिचयः। |

**गीतस्य आशयः।**

- अहं समुद्रकल्लोललालितचरणयुक्ताम् एवं परिशुद्धजलाशययुक्तां तथा च विकसितमनोहर- कमलसहितैः तटाकैः च शोभितां केरलजननीं नमामि।
- श्यामलसस्यवस्त्रयुक्तां चन्दनशीतलपवनेन लालितां प्रबुद्धैः जनैः पूजितां केरलाम्बाम् अहं नमामि।

**प्रवर्तनम् 1**

**उद्देश्यम्-आलपनम्।**

**प्रक्रिया।**

अध्यापकः समुचितरीत्या गीतं द्वित्रिवारम् आलपतु। तत्समये छात्राः श्रद्धया श्रृण्वन्तु। प्रथमं तावत् गीतस्य सम्यक् श्रवणमावश्यकम्। अनन्तरम् अध्यापकः पादमेकैकम् आलपतु। छात्राः श्रुत्वा अनुगायन्तु। एतदेव बहुवारं कृत्वा क्रमेण छात्राणाम् एकैकः संघः गायतु। एवं गीतं तेषां हृदिस्थं भवतु नाम। अनन्तरं छात्रेषु एकैकः पुरतः आगत्य गीतस्य एकैकं पादम् आलपतु। इतरे श्रुत्वा अनुगायन्तु। एतदपि बहुवारमावर्त्य पुनः वैयक्तिकालपनाय अवसरः दातव्यः।

**प्रवर्तनम् 2**

**उद्देश्यम्- गीतमधिकृत्य चर्चा।**

**प्रक्रिया।**

अध्यापकः गीतस्य अर्थविशदीकरणात्पूर्वं केरलस्य प्रकृतिसौन्दर्यं जलसम्पदं केरलीयान् च अधिकृत्य एकां चर्चां नयति। तदर्थं ललितान् प्रश्नान् पृच्छति।

1. अस्माकं राज्यस्य (संस्थानस्य) नाम किम्। (केरलम्)
2. केरलं कीदृशमस्ति? (सुन्दरम्)
3. केरले किं किम् अस्ति? (नदी पक्षिमृगादयः, पर्वतः, केरवृक्षाः, वनम्)

चर्चायां छात्राणां भागभागित्वं निश्चयेन भवितव्यम्। ते संस्कृतेन मातृभाषया वा वदन्तु। कैरल्यां वदन्ति चेत् यथावसरम् अध्यापकः संस्कृतेन परिवर्त्य वदतु। तदनन्तरं गीतस्य आशयं वदतु।

यथा -

अहं केरलमातरं वन्दे।

अहं समुद्रकल्लोलैः लालितपादयुगलां केरलमातरं वन्दे।

अहं विकसितकमलजलाशयसहितां केरलाम्बां नमामि।

| | | | |
|---|---|---|---|
| अहं | सागरलालितचरणां<br>पावनजलततिपूर्णां<br>विकसितमोहननलिनीं<br>सस्यश्यामलवसनां<br>मलयजशीतलपवनाम्<br>बुधजनपूजितधरणीम्। | केरलजननी<br>केरलमातरं<br>केरलाम्बाम्। | नमामि<br>वन्दे<br>नमस्करोमि<br>प्रणमामि। |

**प्रवर्तनम् 3**

**उद्देश्यम् - पट्टिकां पठित्वा न्यूनातिन्यूनं दशवाक्यानि रचयत।**

**प्रक्रिया।**

**यथा -**

अहं सागरलालितचरणां केरलजननीं नमामि।

अहं पावनजलततिपूर्णां केरलमातरं वन्दे।

एवम् अनेकानि वाक्यानि रचयितुं शक्यते। तथापि छात्राः अवरतः दशवाक्यानि रचयन्तु।

तदर्थं पट्टिकाम् एकस्मिन् चार्ट्पत्रे विलिख्य कक्ष्यायां प्रदर्शयतु। लेखनात् पूर्वं छात्राः वाक्यानि वदन्तु। तदनन्तरं लिखन्तु।

**प्रवर्तनम् 4**

**उद्देश्यम् - रिक्तं कविताभागं पाठपुस्तकात् चित्वा लिखतु।**

**प्रक्रिया।**

पाठपुस्तके दत्तां सूचनां (कविताभागं) श्यामफलके विलिख्य प्रदर्शयतु। सूचनानुसारं

गीतांशस्य आलपनाय छात्रान् निर्दिशतु। यथावसरम् अध्यापकः साहाय्यं ददातु।

**प्रवर्तनम् 5**

**उद्देश्यम् - केरलमधिकृत्य कैरल्यां प्रचरितानि गीतानि आलपितुं छात्रान् निर्दिशतु।**

**प्रक्रिया**

अध्यापकः समानाशययुक्तां कवितां चित्वा आनेतुं छात्रान् निर्दिशति। आदर्शरूपः कश्चन कविताभागः

यथा -

പച്ചയാം വിരിപ്പിട്ട സഹ്യനിൽ തല വച്ചും
സ്വച്ഛാബ്ധി മണൽത്തിട്ടാം പാദോപധാനം ചെയ്തും
പള്ളികൊണ്ടീടുന്ന നിൻ പാർശ്വയുമത്തെക്കാത്തു
കൊള്ളുന്നു കുമാരിയും ഗോകർണേശനുമമ്മേ!

(വള്ളത്തോൾ)

अपरश्च-

കേരളം വളരുന്നു പശ്ചിമഘട്ടങ്ങളിൽ
കേറിയും കടന്നും ചെന്നന്യമാം രാജ്യങ്ങളിൽ

(പാലാ നാരായണൻ നായർ)

ജയജയ കോമള കേരള ധരണി
ജയജയ മാമക പൂജിത ജനനീ
മലയജസുരഭില മാരുതനേൽക്കും
മലയാളം ഹാ! മാമകരാജ്യം!
കൽപകതരുനികരങ്ങൾ നിരക്കും
കൽപിതഭൂവാണെന്നുടെ രാജ്യം
കളകളമോതിയിണങ്ങിവരുന്നൊരു
സലിലസമൃദ്ധം മാമകരാജ്യം.
തുഞ്ചശുകീകളക്കണ്ഠനിനാദം
തഞ്ചും മാമക മലയാളത്തിൽ
മാമകമോഹം മാമകഗേഹം
മാമകനാകം മാമകവിലയം!
(കേരളഗാനം) (ബോധേശ്വരൻ)

കേരളം, കേരളം...
കേളികൊട്ടുയരുന്ന കേരളം
കേളീകദമ്പം പൂക്കും കേരളം
കേരകേളീസദനമാം എൻകേരളം
(സിനിമാഗാനം)

**प्रवर्तनम् 6**

**उद्देश्यम् - प्रश्नानाम् उत्तराणि वदतु, लिखतु।**

**प्रक्रिया**

पाठपुस्तकस्य दशमे पुटे केचित् प्रश्नाः दत्ताः सन्ति। तव नाम किम्? इत्यादयः। प्रथमं तावत् कक्ष्यायां प्रश्नान् पृष्ट्वा उत्तरकथनाय छात्राः प्रेरितव्याः। तदनन्तरं लेखनाय निर्दिशतु। अध्यापकस्य औचित्यमनुसृत्य भिन्नतन्त्राणि उपयोक्तव्यानि।

अध्यापकः श्यामफलकस्य एकस्मिन् भागे लिखति। छात्रेषु एकैकः आगत्य एकैकस्य प्रश्नस्य उत्तरं श्यामफलके लिखति।

**प्रवर्तनम् -7**

**उद्देश्यम् - चित्राणि निरीक्ष्य वाक्यानि पूरयन्तु।**

**प्रक्रिया**

पठनप्रवर्तनात् पूर्वम् अध्यापकः भारतस्य वैशिष्ट्यमधिकृत्य लघुचर्चां नयतु। तदर्थं केचन प्रश्नाः प्रष्टव्याः।

**यथा -** भारतस्य देशीयगीतं किम्?
देशीयपशुः कः?
देशीयपुष्पं किम्?
...................

अध्यापकः व्याघ्रस्य, मयूरस्य, आम्रस्य, कमलस्य च चित्राणि, तेषां नामानि च उत्पीठिकायाः उपरि स्थापयति। अनन्तरम् अध्यापकः पुस्तके प्रदत्तान् प्रश्नान् चार्ट्पत्रे विलिख्य प्रदर्शयति। एकैकः छात्रः आगत्य चित्रं नामसहितं सूचयतु।

यथा -

भारतस्य देशीयफलम् - आम्रफलम्।
भारतस्य देशीयपक्षी - मयूरः।
भारतस्य देशीयपशुः - व्याघ्रः।
भारतस्य देशीयपुष्पम् - कमलम्।

### द्वितीयः पाठः

# अन्नम् अमृतम्

**आमुखम्**

भाषापठने संभाषणपरिशीलनस्य प्राधान्यं स्पष्टम्। श्रुत्वा श्रुत्वा उक्त्वा उक्त्वा भाषाम् अधिगच्छन्ति छात्राः। तदर्थं बहवः संभाषणसन्दर्भाः कक्ष्यायाम् अध्यापकेन आयोजयितव्याः। कक्ष्यायाः बहिः संस्कृतभाषाश्रवणाय अवसराः परिमिताः इत्यस्मात् अध्यापकः यथावसरं संस्कृतभाषया वक्तुमर्हति। अस्मिन् पाठे पचनवेला एव संभाषणसन्दर्भः। तस्मात् भोज्यवस्तूनां नामानि प्राधान्येन दत्तानि। पाठोऽयं केवलवाचनार्थं न किन्तु संभाषणपरिशीलनार्थं भवति। तदर्थं सन्तु पठनप्रवर्तनानि।

**पाठस्य नाम** - अन्नम् अमृतम्।

**कालांशाः** - 16

**उद्देश्यम्** - संभाषणपरिशीलनम्।
भक्ष्यवस्तूनां नामपरिचायनम्।
उपचारपरिज्ञानम्।

**नैपुणी** - संस्कृतसंभाषणनैपुणी।
संस्कृतपदस्वाधीनम्।
भावानुकरणसामर्थ्यम्।

| आशयः/ धारणाः/ व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| 1. संस्कृतसंभाषणस्य लालित्यम्।<br>2. भक्ष्यवस्तूनां संस्कृतनामानि।<br>3. संभाषणे औपचारिकता।<br>4. प्रश्नवाचकशब्दानां प्रयोगः।<br>5. उचितभक्षणशीलानि।<br>6. अनुचितभक्षणशीलानां दोषाः। | 1. श्रद्धया श्रवणम्।<br>2. श्रुत्वा अनुवाचनम्।<br>3. खाद्यपेयानां वर्गीकरणम्।<br>4. भावानुकरणकेली।<br>5. भागं गृहीत्वा संस्कृतेन संभाषणम्। | 1. भक्ष्यवस्तूनां नामानि वदति लिखति च।<br>2. सम्भाषणम् अवतारयति।<br>3. संभाषणे औपचारिकतां पालयति।<br>4. प्रश्नवाचकशब्दान् प्रयुङ्क्ते।<br>5. आहारशीलानां प्राधान्यमधिकृत्य टिप्पणीं लिखति । |

पाठस्यास्य पठनात्पूर्वं पूर्वपठितानां प्रश्नवाचकशब्दानां पुनःस्मारणम् अध्यापकेन कार्यम्। तदर्थम् अध्यापकेन काञ्चन प्रश्नान् पृष्ट्वा उत्तरं वक्तुम् अवसरः दातव्यः।

यथा -

- भवतः नाम किम्?
- भवत्याः नाम किम्?
- भवतः/भवत्याः गृहं कुत्र वर्तते?
- गृहे कति जनाः सन्ति?
- गृहस्य नाम किम्?

एतादृशसंभाषणेन यावच्छक्यं प्रश्नवाचकशब्दानां स्मारणं कृत्वा पुनः भक्ष्यपदार्थानां नामानि परिचाययतु। भक्षणपदार्थानां संस्कृतनामानि यानि जानन्ति छात्राः तानि वदन्तु।

ते कैरल्यां वदन्ति चेत् अध्यापकः तत्समय एव तस्य संस्कृतनाम उक्त्वा श्यामफलके लिखतु। भक्षणपदार्थानां नामानि परिचाययितुं पूर्वमेव सज्जीकृतस्य चार्ट्पत्रस्य उपयोगः कार्यः। पाठपुस्तके अनुबन्धरूपेण भोज्यवस्तूनां नामानि दत्तानि। तानि स्वीकृत्य चार्ट्पत्रं सज्जीकर्तुं शक्यते। एवं भोज्यवस्तूनां चित्राण्यपि चार्ट्पत्रे प्रदर्शयित्वा नामकथनाय प्रेरयति चेत् तत् छात्राणाम् अभिप्रेरणादायकं भवेत्।

पाठप्रवेशनात्पूर्वम् ओणोत्सवमधिकृत्य एका चर्चापि कार्या। अध्यापकः प्रश्नान् पृष्ट्वा उत्तरकथनाय छात्रान् प्रेरयतु। अध्यापकः संस्कृतेन वदतु। छात्राः कैरल्यां यत् वदन्ति तत् संस्कृते परिभाषां कृत्वा वदतु।

1. केरलानां देशीयोत्सवः कः?
2. श्रावणोत्सवः (ओणोत्सवः) कस्मिन् मासे आगच्छति?
3. सिंहमासे प्रकृतिः कथभवति?

चर्चाया अन्ते पुस्तकम् उद्घाट्य पाठभागं सस्वरं स्पष्टञ्च द्वित्रिवारं वाचयतु। छात्राः श्रद्धया श्रृण्वन्तु। अध्यापकस्य वाचनं श्रुत्वा छात्राः अनुवाचयन्तु। पुनश्च व्यक्तिगतवाचनाय छात्रान् प्रेरयतु। छात्राणां वाचने यत्र यत्र स्खालित्यानि भवेयुः तत्र तत्र अध्यापकस्य संशोधनम् आवश्यकम्।

**प्रवर्तनम् 1**

**उद्देश्यम्- भावानुकरणकेलिः।**

**प्रक्रिया**

अस्मिन् प्रवर्तने छात्राः पाठपुस्तकस्थानि कथापात्राणि अनुकृत्य संभाषणं कुर्वन्ति।

पाठभागे विवेकः तस्य माता पिता सोदरी च सन्ति। एकैकस्य भागं गृहीतुम् एकैकः एकैका वा आगच्छतु। परिशीलनार्थं समयः दातव्यः। परिशीलनं कृत्वा ते संभाषणम् अवतारयन्तु। अध्यापकः साहाय्यं यच्छतु। एकस्य संघस्य अवतारणानन्तरम् अपरः संघः आगच्छतु। एकैकस्य अवतारणानन्तरम् इतरे मूल्यनिर्णयं कुर्वन्तु।

**मूल्यनिर्णयसूचिका:**

1. संभाषणस्य स्पष्टता अनर्गलता च।
2. भावाभिनयः।
3. तन्मयत्वम् (कथापात्रैः सह)।

**प्रवर्तनम् 2**

**उद्देश्यम्- चर्चा।**

**प्रक्रिया**

भावानुकरणकेलीं समाप्य भक्षणशीलमधिकृत्य एका चर्चा कार्या। तदर्थम् एव प्रश्नान् पृष्टुं शक्यते।

1. भोजनात् पूर्वम् अस्माभिः किं कर्तव्यम्?
2. भोजनान्तरं किं कर्तव्यम्?
3. कीदृशं भक्षणं भक्षणयोग्यं भवति?
4. कीदृशं भक्षणं भोक्तुम् अयोग्यं भवति?

प्रश्नानाम् उत्तराणि छात्राः संस्कृतेन कैरल्या वा वदन्तु। कैरल्यां चेत् संस्कृतपरिभाषां कृत्वा फलके लिखित्वा वाचनावसरोऽपि दातव्यः।

पाठपुस्तके दत्तानि पठनप्रवर्तनानि।

**प्रवर्तनम् 3**

**उद्देश्यः - इष्टभोज्यानि।**

**प्रक्रिया**

छात्राः पाठपुस्तकस्थं शब्दकोशं निरीक्ष्य तेषाम् इष्टभोज्यानि कानि इति वदन्तु, पुनश्च लिखन्तु। उचितां सूचनां ददातु। यथा-

मम प्रियभोज्यानि रोटिका, दोशा, मोदकम्।

**प्रवर्तनम् 4**

**उद्देश्यम् - भोज्यवस्तूनां वर्गीकरणम्।**

**प्रक्रिया**

अनुबन्धरूपेण भक्षणपदार्थानां नामानि दत्तानि। तेषां साहाय्येन छात्राः भोज्यवस्तूनि वर्गीकृत्य उक्त्वा पुनः पट्टिकारूपेण लिखन्तु। तत्पूर्वं खाद्यं पेयम् इति द्वयोः भेदम् अध्यापकः विशदयतु।

खाद्यम् - खादितुं योग्यम् ।

पेयम् - पातुं योग्यम्।

**भोज्यवस्तूनि**

| **खाद्यम् ।** | **पेयम्।** |
|---|---|
| अपूपः। | क्षीरम्। |
| बाष्पापूपः। | तक्रम्। |
| पूरिका। | पायसम्। |
| दोशा। | चाया। |
| घृतापूपः। | काफी। |
| सूत्रापूपः। | फलरसः। |

**निर्दिष्टाभ्यासः।**

छात्रान् संघान् कृत्वा भोज्यवस्तूनां चित्राणि यावच्छक्यं सम्पाद्य चित्रपुस्तकनिर्माणाय प्रेरयतु। निर्माणप्रकारः अध्यापकेन विशदीकर्तव्यः।

छात्रैः निर्मितानां चित्रपुस्तिकानां प्रकाशनं कृत्वा वाचनकोणे ग्रन्थालये वा स्थापयतु।

## तृतीयः पाठः

# दीपावलिः

**आमुखम्**

भारतेषु बहवः उत्सवाः सन्ति। सर्वान् उत्सवान् वयं समुचितरीत्या आचरामः। तेषु दीपावलिः, नवरात्रिः, होली, क्रिस्तुमस्, रमदान् आदयः प्रधानाः। दीपावलिमधिकृत्य रचितः पाठोऽयम्।

**पाठस्य नाम - ** दीपावलिः।

कालांशः - 14

उद्देश्यम् - विवरणं पठित्वा आशयग्रहणम्। उत्सवानां प्राधान्यं प्रत्यभिजानाति।

दीपावलिमहोत्सवाचरणस्य औचित्यं प्रत्यभिजानाति।

| आशयः/ धारणाः/ व्यवहाररूपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| 1. विवरणं नाम व्यवहाररूपं परिचिनोति।<br>2. भारते वहवः उत्सवाः सन्ति।<br>3. उत्सवानां वैविध्यमस्ति।<br>4. उत्सवाः जनानाम् ऐक्यं परिपोषयन्ति। | 1. उत्सवानां वैविध्यं विवेचयति।<br>2. चित्राणि निरीक्ष्य उत्सवानां सविशेषताः वदति लिखति च।<br>3. ऐतिह्यकथाः ज्ञात्वा वदति।<br>4. ज्ञातविषयमधिकृत्य विवरणं लिखति। | 1.देशीयोत्सवानां वैविध्यम् अधिकृत्य चर्चा। प्रत्येकम् उत्सवस्य सविशेषताः लिखन्ति।<br>2.उत्सवानां हेतुभूतान् ऐतिह्यान् ज्ञात्वा लिखति। विवरणं नाम व्यवहाररूपं स्वयं सृजति। |

**प्रवर्तनम् 1**

**उद्देश्यम्- दीपालिविषये चर्चा।**

**प्रक्रिया**

अध्यापकः दीपावलिमधिकृत्य चर्चां नयति। तदर्थं काञ्चित् प्रश्नान् पृच्छति।

1. दीपावलिः कस्मिन् मासे भवति?
2. दीपावलिदिने जनाः किं किं कुर्वन्ति।
3. दीपावलिः इति नाम्नः औचित्यं किम्?

छात्राणाम् उत्तराणि फलके लिखतु। छात्राः कैरल्यां वदति चेत् संस्कृतेन परिवर्त्य लिखतु।

अनन्तरं दीपावलिमहोत्सवस्य कारणभूतं ऐतिह्यं किमिति पृच्छति। छात्राः न वदन्ति चेत् अध्यापकः कथां वदति।

**दीपावलिः ऐतिह्यकथा।**

हिरण्याक्षो नाम असुरचक्रवर्ती आसीत्। तस्य पुत्रः नरकासुरः अतिशक्तः। दुष्टबुद्धिः नरकासुरः विष्णुदेवात् नारायणास्त्रं प्राप्नोति। तेन इतरैः जेतुम् अजय्यः नरकासुरः सर्वान् पीडयन् शासनमकरोत्। तेन भीताः देवाः विष्णोः सविधं गत्वा अभयं प्रार्थितवन्तः। विष्णोः अवतारः श्रीकृष्णः स्वपत्न्या सत्यभामया सह गरुडारूढः सन् आगत्य नरकासुरवधमकरोत्। तद्दिनं मानवाः दीपावलिरूपेण आघुष्यन्ते।

**अन्या काचनकथा।**

श्रीरामः चतुर्दशवर्षीयं वनवासं समाप्य दीपावलिदिनाङ्के अयोध्यां प्राप्तः इति अन्या कथाप्यस्ति।

पाठस्यास्य अनुशीलनेन दीपावलिनामकस्य उत्सवस्य सविशेषताः, उत्सवस्य प्राधान्यं उत्सवानां प्रसक्तिः इत्येते अंशाः छात्राः आर्जयन्तु।

**प्रवर्तनम् 2**

**उद्देश्यम्- उच्चैर्वाचनम्।**

**प्रक्रिया**

पाठभागम् अध्यापकः द्वित्रिवारम् उच्चैः पठतु। अनन्तरम् अध्यापकः खण्डशः पठति। श्रुत्वा अनुपठनाय छात्रान् निर्दिशतु। प्रवर्तनमिदं द्वित्रिवारं भवतु। पश्चात् छात्रान् संघवाचनाय निर्दिशतु। संघे ते परस्परसाहाय्येन पाठभागं सम्यक् पठन्तु। संघवाचनानन्तरं वैयक्तिकवाचनाय छात्रान् निर्दिशतु। दोषान् परिहृत्य अध्यापकः उचितं साहाय्यं करोतु।

**प्रवर्तनम् -3**

**उद्देश्यम्- उत्सवानां वैशिष्ट्यविषये चर्चा।**

**प्रक्रिया**

अध्यापकः उत्सवानां प्राधान्यमधिकृत्य छात्रैः सह लघुचर्चां करोतु। तदर्थं ललितान् काञ्चन प्रश्नान् पृच्छतु। छात्राणाम् उत्तराणि क्रोडीकृत्य संस्कृतेन फलके लिखित्वा वाचनाय निर्दिशतु।

**यथा -**

1. अस्माकं प्रधानाः उत्सवाः के?

   (श्रावणोत्सवः, क्रिस्तुमस्, रमदान्, दीपावलिः, विषुमहोत्सवः)

2. उत्सवदिनेषु वयं किं किं कुर्मः?

   (नूतनवस्त्राणि धरामः, मधुरभोज्यानि खादामः, सद्ध्यिं पचामः, क्रीडामः)

चर्चायां सर्वेषां छात्राणां भागभागित्वम् आवश्यकम्। अनन्तरम् उत्सवानधिकृत्य लघुविवरणम् अध्यापकः छात्रेभ्यः ददातु।

वयं विविधान् उत्सवान् आघुष्यामः। उत्सवाः सन्तोषस्य आघोषस्य च वेलाः भवन्ति। तेषु दिनेषु सर्वे जीवितक्लेशान् विस्मृत्य सन्तुष्यन्ति। वयं नूतनवस्त्राणि धृत्वा बान्धवानां गृहं गच्छामः, मधुरभोज्यानि खादाम;, विभवसमृद्धं सद्ध्यिं पचामः, मित्रैः सह आनन्देन क्रीडामः। उत्सवाः सर्वथा सन्तोषदायकाः भवन्ति। विषुः,रमदान् ,क्रिस्तुमस् आदयः अस्माकं प्रधाना; उत्सवाः भवन्ति।

**प्रवर्तनम् -4**

**उद्देश्म् - यथोचितं योजनम्।**

**प्रक्रिया**

अध्यापकः पाठपुस्तके दत्तानां चित्राणां लघुविवरणं करोतु। चित्रे किं किम् अस्ति इति छात्रान् बोधयतु। अनन्तरं कोष्ठके दत्तानि उत्सवानां नामानि पठतु। यथोचितं चित्राणाम् अधः लेखनाय निर्दिशतु। लिखितानि छात्राः कक्ष्यायाम् अवतारयन्तु।

| | |
|---|---|
| ചിത്രം 1 | ചിത്രം 2 |
| होली। | रमदान्। |
| ചിത്രം 3 | ചിത്രം 4 |
| क्रिस्तुमस्। | ओणम्। |

**प्रवर्तनम् -5**

**उद्देश्यम् - वर्णलेपनम् आशंसापत्ररचना च।**

**प्रक्रिया**

കളർ ചിത്രം കളർചിത്രം

अध्यापकः उत्सवानां लघुचित्राणि छात्रेषु वितरतु। एकैकस्मिन् कागदे एकैकस्य उत्सवस्य चित्रं भवतु। चित्राणि वर्णेन लिम्पन्तु छात्राः। वर्णलेपनानन्तरं तेषां चित्राणामधः आशंसां च लिखन्तु। तानि अध्यापकः कक्ष्यायां प्रदर्शयतु।

यपाठपुस्तकस्थयोः चित्रयोः अधः क्रिस्तुमस् आशंसाः, दीपावली आशंसाः इत्येवं लिखन्तु छात्राः।

**एतेषां चित्राणां प्रतिकृतयः स्वीकृत्य छात्रेभ्यः देयाः।**

| | |
|---|---|
| ओणम् | क्रिस्तुमस् |
| आशंसाः | आशंसाः |
| दीपावलि | रमदान् |
| आशंसाः | आशंसाः |
| नवरात्रिः | विषुः |
| आशंसाः | आशंसाः |

# द्वितीयम् - एककम्

# VÉÒ´ExÉSÉÊ®ÉiÉ É

अस्मिन्नेकके श्रीनारायणगुरुदेवस्य जीवनचरितम् द्विचक्रिकायाः आत्मकथाश्च वर्तेते। जीवनचरितं, आत्मकथा इति द्वयोः व्यवहाररूपयोः परिचयसम्पादनार्थम् आयोजितम् एककम् एतत्।

## पठनाधिगमाः

* जीवनचरितं पठित्वा आशयं वदति।
* चित्राणि दृष्ट्वा लघुवाक्यानि वदति लिखति च।
* महात्मनां जीवनचरितं पठति। आत्मकथां पठति।
* वाहनानां संस्कृतनामानि पठति।
* व्यायामस्य प्राधान्यं वदति।

## चतुर्थः पाठः

# श्रीनारायणगुरुदेवः

### आमुखम्

भाषाव्यवहाररूपेषु अन्यतमं भवति जीवनचरितम्। अस्मिन् पाठे श्रीनारायणगुरुदेवस्य जीवनचरितं संक्षिप्तरूपेण दत्तमस्ति। गुरुदेवस्य परिचायनाय आयोजितः अयं पाठः। छात्राणां देशभक्तेः संवर्धनाय गुरुदेवस्य कृतीनां लघुपरिचायनाय अपि अत्र अवसरः अस्ति।

**पाठः** - श्रीनारायणगुरुदेवः।

**कालांशः** - **16**

**उद्देश्यम्** - महात्मनः प्रति आदरः।

**नैपुणीः** - जीवनचरितलेखनम्, संस्कृते महात्मनां नाम लेखनम्
गुरुदेवग्रन्थानां परिचायनम्।

| आशयः/ धारणाः/ व्यवहाररुपाणि। | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः। |
|---|---|---|
| श्रीनारायणगुरुदेवस्य जीवनचरितं पठति।<br>भारते बहवः महात्मनः आसन्।<br>ते समाजस्य प्रगत्यै यतितवन्तः। | वाचनम्<br>महापुरुषाणां नामलेखनम्।<br>गुरुदेवकृतीनां परिचायनम् | जीवनचरितं पठति।<br>आशयं वदति।<br>महापुरुषाणां नामानि संस्कृते लिखति।<br>गुरुदेवग्रन्थानधिकृत्य टिप्पणी लिखति।<br>महात्मनां जीवनचरितानि पठति। |

**पाठावतरणम्**

अध्यापकः उचितया रीत्या पाठावतरणं कर्तुमर्हति। अत्र एकम् उदाहरणं प्रदर्शयति। अध्यापकः अनौपचारिकसंभाषणानन्तरं फलके एकं वाक्यं लिखति। "एका जातिः, एको धर्मः, एको देवः मनुष्यस्य" इति वाक्यस्य पठनाय छात्रान् निर्दिशति। वाक्यमिदं केनोक्तमिति पृष्ट्वा उत्तरकथनाय छात्रान् प्रेरयति। छात्राः वाक्यं पठित्वा प्रायेण तत् श्रीनारायणगुरुदेवस्य वाक्यमिति प्रत्यभिजानन्ति। ഒരു ജാതി, ഒരുമതം ഒരു ദൈവം മനുഷ്യന് इति कैरलीवाक्यम्। तस्य संस्कृतभाषान्तरीकरणं च अध्यापकः चार्ट्पत्रे विलिख्य प्रदर्शयति।

| | |
|---|---|
| ഒരു ജാതി, ഒരുമതം | एका जातिः एको धर्मः |
| ഒരു ദൈവം മനുഷ്യന് | एको देवः मनुष्यस्य |

श्रीनारायणगुरुदेवमधिकृत्य कांञ्चित् प्रश्वान् पृष्ट्वा पाठावतरणामुचितम्।

1. श्रीनारायण गुरोः जन्मदेशः कः?
2. गुरोः पितरौ कौ?
3. नारायणगुरोः समाधिः कुत्र अवर्तत?

एवं प्रश्नान् पृष्ट्वा पाठपुस्तकम् उद्घाट्य वाचनप्रकारं परिचाययतु। द्वित्रिवारं वाचनरीतिं श्रृण्वन्तु छात्राः। अनन्तरं छात्रमैकैकं वाचनाय प्रेरयतु। वाचनावसरे अध्यापकः दत्तश्रद्धः भवितुमर्हति। स्खालित्यानि परिहर्तव्यानि।

पाठपुस्तकस्थानि पठनप्रवर्तनानि

**प्रवर्तनम् -1**

**उद्देश्यम्- पाठभागस्य उच्चैर्वाचनम्।**

**प्रक्रिया**

अध्यापकः सुष्ठु आदर्शवचनं करोति। पुनः प्रथममनुच्छेदं पुनरपि पठति। छात्राः वैयक्तिकरूपेण पठन्तु। वाचनाय छात्रान् प्रोत्साहयतु। एवं चतुर्णामपि अनुच्छेदानाम् अनुवाचनं छात्रैः कार्यम्।

**प्रवर्तनम् -2**

**उद्देश्यम्- महात्मानां चित्राणि दृष्ट्वा तान् प्रत्यभिजानाति।**

**प्रक्रिया**

चित्रं प्रदर्श्य चित्रे कः अस्ति इति पृष्ट्वा उत्तरकथनाय छात्रान् प्रेरयतु। अन्येषां केषांचन महात्मनां (यथा - के. केलप्पन्, वक्कं अब्दुल् खादर् खान्, अय्यङ्कालि, सहोदरन् अय्यप्पन्) चित्राणि चार्ट्पत्रे प्रदर्श्य चित्रे कः अस्ति इति पृच्छतु। अन्ते श्रीनारायणगुरुदेवस्य चित्रं प्रदर्शयति । तेन पाठप्रवेशे स्वाभाविकता भवति।

चित्राणि दृष्ट्वा छात्रैरुक्तानि नामानि फलके संस्कृते लिखित्वा लेखनप्रचारं परिचिनोतु। अनन्तरं महात्मनां नामानि छात्राः पुस्तकं दृष्ट्वा निर्दिष्टस्थाने लिखतु। अध्यापकः स्खालित्यनिवारणं करोतु।

पाठपुस्तकस्य प्रश्नस्योत्तराणि।

1. नारायणगुरुः रवीन्द्रनाथठक्कुरः च।
2. नारायणगुरुः गान्धिजी च।
3. नारायणगुरुः कुमारनाशान् महाशयः च।
4. अय्यङ्कालि।
5. चट्टम्पिस्वामी।

**प्रवर्तनम् -3**

**उद्देश्यम्- गुरुदेवकृतीनां नामग्रहणम्।**

**प्रक्रिया**

**आत्मोपदेशशतकम्, दैवदशकम्, दर्शनमाला, अद्वैतदीपिका, वेदान्तसूत्रम्**

छात्राः चित्रं निरीक्ष्य गुरुदेवकृतीनां नामानि संस्कृते लिखन्तु। अध्यापकः यथोचितं साहाय्यं करोतु। छात्रेभ्यः एकैकः आगत्य ग्रन्थानां नामानि फलके लिखन्तु। पश्चात् शोधयित्वा पुस्तके लिखन्तु

**निर्दिष्टाभ्यासः**:-छात्रान् संघान् कृत्वा समाजोद्धारकाणां महात्मनां चित्राणि आनयनाय निर्दिशतु। अनन्तरम् एकस्य चित्रकोशस्य निर्माणाय प्रेरयतु।

पञ्चमः पाठः

# द्विचक्रिकायाः दुःखम्

**आमुखम्**

व्यवहाररूपाणि अनेकानि सन्ति। तेषु अन्यतमं भवति जीवनचरितं (श्रीनारायणगुरुदेवः) छात्रैः पठितम्। तादृशमन्यं भाषारूपं भवति आत्मकथा। द्वयमपि जीवनचरितं किन्तु एकत्र एकस्य जीवनचरितम् इतरेण वर्ण्यते, अन्यत्र स्वजीवनचरितं स्वयमेव वर्णयति । साहित्यरूपेषु जीवनचरितमिव आत्मकथायाः अपि प्राधान्यमस्ति। तत् मनसि कृत्वा सङ्कलितोऽयं पाठभागः। पाठे द्विचक्रिका तस्याः कथां वदति।

**पाठनाम** - द्विचक्रिकायाः दुःखम्।

**कालांशः** - 16

**उद्देश्यम्** - आत्मकथा नाम व्यवहाररूपं परिचिनोति।
आत्मकथायाः वैशिष्ट्यम् अवगच्छति।
द्विचक्रिकायाः सविशेषतां परिचिनोति।

**नैपुणीः** - वाहनानां संस्कृतनामानि परिचिनोति

| **आशयः/ धारणाः/ व्यवहाररूपाणि।** | **पठनप्रवर्तनानि/ पठनतन्त्राणि** | **पठनाधिगमाः।** |
|---|---|---|
| द्विचक्रिकायाः सविशेषताः प्रत्यभिजानाति वाहनानां संस्कृतनामानि अवगच्छति। | सस्वरवाचनम्। आशयानां वर्गीकरणम्।<br>चित्रं दृष्टवा वाचनं लेखनं च।<br>पट्टिकाकरणम्। | आत्मानमधिकृत्य वदति चित्रं दृष्ट्वा वाहनानां नामावि वदति। |

**पाठावतरणम्**

छात्राः लघुवाक्यैः आत्मानमधिकृत्य किञ्चित् वदन्तु। आदर्शरूपेण अध्यापकः सरलभाषया स्वपरिचायनं करोतु।

**यथा**

अहं रमेशः। मम गृहं ग्रामे वर्तते। मम गृहे माता पिता सोदरी च सन्ति। मम गृहस्य समीपे एका नदी वर्तते............। एवं वक्तुं छात्रान् प्रेरयति।

अनन्तरम् अध्यापकः वाहनानां केषांचित् चित्राणि प्रदर्श्य तेषां संस्कृतनामानां कथनाय छात्रान् प्रेरयति।

यथा - कार्यानम्, त्रिचक्रिका, बस्यानम्......

चित्रे दत्तानां वाहनानां नामानि अध्यापकः द्वित्रिवारम् उच्चैः वदतु। तानि श्रुत्वा वक्तुं छात्रान् निर्दिशति। अन्ते अध्यापकः सैक्किल्यानस्य चित्रं प्रदर्श्य नाम परिचाययतु।

**प्रवर्तनम् 1**

**उद्देश्यम्- आशयावगतिः।**

**प्रक्रिया**

अनन्तरम् अध्यापकः सैक्किल्यानस्य सविशेषतामधिकृत्य कथनाय निर्दिशति। छात्राः मातृभाषया यद्वदन्ति तत् अध्यापकः संस्कृते परिवृत्य श्यामफलके लिखति। लिखितानि अध्यापकः एकवारं पठित्वा पाठपुस्तकं उद्घाट्य सुस्पष्टं पठतु । छात्राः पाठभागं सम्यक् श्रृण्वन्तु। द्वित्रिवारं वाचयित्वा वाचनाय छात्रान् प्रेरयतु। कतिपयछात्राणां वाचनानन्तरं पाठभागस्य आशयं छात्राः वदन्तु, अध्यापकः परिष्कृत्य फलके लिखतु। छात्राः टिप्पणीपुस्तके लिखन्तु।

**प्रवर्तनम् -2**

**उद्देश्यम्- चित्रं पश्यतु, नामानि उच्चैः पठतु लिखतु।**

**प्रक्रिया**

परिचितानां वाहनानां संस्कृतनामानि परिचाययितुं दत्तं प्रवर्तनमिदम्। पुस्तके केषाञ्चन वाहनानां नामानि तेषां चित्राणि च दत्तानि सन्ति। तानि नामानि अध्यापकः द्वित्रिवारं पठतु। अनन्तरं चित्राणाम् अधः उचितनामानि योजयितुं छात्रान् निर्दिशतु।

महानौका। लोकयानम्। रेल्यानम्।

नौकायानम्। त्रिचक्रिका।

भारवाहकम्। मञ्चः। विमानम्।

**अनुबन्धप्रवर्तनम्**

वाहनानां चित्राणि सञ्चित्य आनयन्तु। छात्रान् संघान् कृत्वा प्रतिसंघम् एकैकं चार्ट्पत्रे वाहनानां चित्राणि स्थापयित्वा नामानि लिखतु। तेषां प्रकाशनाय निर्दिशतु। संघाः मात्सर्येण प्रवर्तनमिदं कुर्वन्तु।

**प्रवर्तनम् -3**

**उद्देश्यम् - यानानां नामानि विविच्य पट्टिकां करोतु।**

**प्रक्रिया**

अनेन प्रवर्तनेन लेखनपरिशीलनमेव उद्दिश्यते। यानानां वर्गीकरणं सुकरमेव। पूर्वोक्तप्रवर्तनानां साहाय्येन वर्गीकरणं कर्तुं छात्राः प्रभवन्ति। लेखने अध्यापकस्य साहाय्यमावश्यकं भवति।

**मूल्यनिर्णयसूचिकाः**

1. वाहनानां नामानि वदति।
2. उचितं वर्गीकरणं कृतम्।
3. पट्टिकायाम् उचितस्थाने लिखितानि।

| भूतलयानानि | आकाशयानानि | जलयानानि |
|---|---|---|
| लोकयानम्<br>रेल्यानम्<br>भारवाहकम्<br>मञ्चः<br>त्रिचक्रिका | विमानम्<br>बहिराकाशवाहनम् | महानौका<br>नौकायानम् |

**प्रवर्तनम् 4**

**उद्देश्यम्- नूतनपदचयनम्।**

**प्रक्रिया**

पाठपुस्तके विद्यमानानां नूतनपदानां चयनाय छात्रान् प्रेरयतु। अध्यापकः उचितं साहाय्यं ददातु। अनन्तरं पदानाम् अर्थं शब्दकोशं निरीक्ष्य अवतारयन्तु। अध्यापकः शोधयतु, परिष्कृत्य टिप्पणीपुस्तके लिखन्तु।

**प्रवर्तनम् -5**

**उद्देश्यम्- आशयानां वर्गीकरणम्।**

**प्रक्रिया**

प्रवर्तनेऽस्मिन् कानिचन वाक्यानि दत्तानि । तेषु कानिचित् सैक्किल्यानेन संबद्धानि इतराणि च मोट्टोर्यानेन संबद्धानि। वाक्यानि पठित्वा तेषां वर्गीकरणं छात्रैः करणीयम्। तत्पूर्वं तयोः वाहनयोः सविशेषताः अधिकृत्य चर्चा आयोजितव्या।

**चर्चासूचिके**

1. तयोः वाहनयोः के भेदाः ?
2. सैक्किल्यानस्य उपयोगेन के लाभाः भवन्ति ?

छात्रैः वर्गीकृतानि पाठपुस्तके दत्तपेटिकायां लिखतु। अनन्तरं तानि शोधयित्वा अध्यापकः चार्ट्पत्रे विलिख्य प्रदर्शयतु।

**मूल्यनिर्णयसूचिके।**

वर्गीकरणं समीचीनतया कृतम्।

वर्गीकृतानि यथोचितं लिखतानि

| सैक्किल्यानम् | मोट्टोर्यानम् |
|---|---|
| 1. कृशमार्गेण अनयासेन गमनम्।<br>2. अन्तरिक्षमलिनीकरणं न संभवति।<br>संभवति।<br>3. क्रेतुम् अल्पमेव धनं पर्याप्तम्।<br>4. उपयोगेन व्यायामं लभते।<br>5. हिता यात्रा व्ययं विना। | 1. इन्धनस्य कृते अधिकव्ययः अस्ति।<br>2. विषधूमेन अन्तरिक्षमलिनीकरणं<br><br>3. क्रेतुम् अधिकं धनम् आवश्यकम्। |

**प्रवर्तनम् -6**

**उद्देश्यम् - सैक्किल्यानं मार्गे किं किं पश्यति। वदतु लिखतु च।**

**प्रक्रिया**

चित्रं निरीक्ष्य मार्गे किं किम् अस्ति इति छात्राः वदन्तु। छात्राणाम् उत्तराणि अध्यापकः फलके लिखित्वा लेखनप्रकारं प्रदर्शयतु।

| | | | | |
|---|---|---|---|---|
| यथा - | | मार्गे | विद्यालयं | पश्यति। |
| | | मार्गे | बालिके | पश्यति। |
| | सैक्किल्यानं | मार्गे | खगौ | पश्यति। |
| | | मार्गे | यानं | पश्यति। |
| | | मार्गे | वृक्षं | पश्यति। |

लिखितानि छात्राः पठन्तु, अवतारयन्तु। अध्यापकसाहाय्येण शोधयित्वा टिप्पणीपुस्तके लिखतु।

# तृतीयम् एककम्

ÉnixÉSÉaÉE

दिनचर्यायाः आचरणमतीव प्राधान्यमर्हति। बाल्यकालादारभ्यमानानि शीलानि न कदापि विस्मरति। दिनचर्यावतः सूर्यस्य वर्णनेन सूर्योदयः नाम कविता, राधिकायाः एकं दिनम् इति पाठभागः च एकके<ऽस्मिन् स्तः।

## पठनाधिगमाः

* दिनदर्शिकां दृष्ट्वा दिनाङ्कानि वदति।
* दैनिकीं पठति लिखति।
* घटिकां निरीक्ष्य समयं वदति।
* गीतं सतालमालपति।
* समानार्थकाः कविताः पठति ।

षष्ठः पाठः

# सूर्योदयः

## आमुखम्

सूर्योदयः इति कवितया अत्र प्रकृतिः वर्णनम् उद्दिश्यते। सूर्योदये सति प्रकृत्याम् अनेकानि परिवर्तनानि जायन्ते। सर्वेषां मनांसि चोदयन् सूर्यः उदयते।

बालकवितानां श्रवणे आलपने च तात्पर्यवर्धनार्थं तथा प्रकृतेः सौन्दर्यवर्धनार्थं च आयोजितः पाठः एषः। गीतानां तालानुसारालपने श्रद्धा करणीया।

पाठः - सूर्योदयः।
कालांशः - 14
उद्देश्ये - गीतालपनेन प्रकृतेः वर्णनम्।
प्रकृतिपरिचायनम्।
नैपुणीः - सूर्यस्य नामान्तराणां परिचायनम्।
वाक्यलेखनसामर्थ्यम्।

| आशयः/धारणा/ व्यवहाररूपाणि | पठनप्रवर्तनानि | पठनाधिगमाः |
|---|---|---|
| सूर्योदये प्रकृत्यां विद्यमानानि परिवर्तनानि वर्णयति। | गीतालपनम्।<br>पदसूर्यस्य पूरणम्। | गीतालपनं करोति।<br>कविताया:आशयं वदति। |
| बालकवितालपने तात्पर्यम् | चित्रं दृष्ट्वा वाक्यकथनम् | चित्रं दृष्ट्वा वाक्यनि लिखति। सूर्यस्य इतरनामानि पठति। समानार्थकाः कविताः सञ्चिनोति। |

**पाठावतरणम्**

अध्यापकः प्रथमम् एकां चर्चां चालयतु ।

**चर्चासूचिकाः**

1. सूर्योदयः कदा भवति?
2. सूर्योदयं दृष्टवन्तः के?
3. सूर्योदये कानि परिवर्तनानि जायन्ते?
4. तदा मानवाः किं कुर्वन्ति?

चर्चायां सर्वेषां भागभागित्वाय अध्यापकः साहाय्यं करोतु। छात्रैः सूचितानि उत्तराणि अध्यापकः फलके लिखतु। तानि उच्चैः पठतु। तेषाम् उत्तराणि सञ्चित्य क्रोडीकृत्य वदतु। पश्चात् पाठपुस्तकस्य अवतारणं करोतु।

## प्रवर्तनम् 1

### उद्देश्यम् - सतालं कवितालपनम्।

**प्रक्रिया :**

अध्यापकः प्रथमं स्वयम् उपकरणानां साहाय्येन वा (C.D Player) गीतं श्रावयतु। द्वित्रिवारं पाठस्य श्रवणानन्तरम् एकैकं पादम् अनुगानाय छात्रान् निर्दिशतु। प्रवर्तनमिदं द्वित्रिवारं कृत्वा पुनः गीतं सम्पूर्णतया अध्यापकः गायतु। छात्राः श्रुत्वा अनुगायन्तु। पश्चात् छात्राणां पुरतः आगत्य गानालपनाय निर्दिशतु। अध्यापकः यथोचितं साहाय्यं करोतु। संघालापनानन्तरं छात्राः वैयक्तिकतया गीतस्य आलपनं करोतु। इतरे अनुगायन्तु। एवं प्रकारेण कवितामिमां पठन्तु।

## प्रवर्तनम् -2

### उद्देश्यम् - कवितायाः आशयं वदतु लिखतु च।

**प्रक्रिया :**

कवितायां वर्तमानानां पदानाम् आशयं यथावत् अध्यापकः विशदयति। तेषां प्रतिपादम् अर्थं सूचयति। पुनः छात्राः पठन्तु। तथा अर्थानां साहाय्येन अध्यापकः यथोचितं साहाय्यं करोतु। छात्राणाम् आशयकथनानन्तरम् अध्यापकः आशयं पुनरपि वदतु। आशयं फलके लिखतु। टिप्पणीपुस्तके लेखनाय छात्रान् निर्दिशतु।

## कवितायाः आशयः

अरुणसारथिः सूर्यः मनांसि प्रचोदयन् आकशसीमनि प्रतिदिनम् उदयति। तदा कुसुमानि विकसन्ति, लताः नृत्यन्ति, मृगपक्षिसमूहः सर्वत्र चरति। स्वकिरणानि सर्वतः प्रसारयन् अन्धकारं नाशयन् सर्वानपि पवित्रयन् सूर्यः उदितवान्। सर्वेषां जीविनां मनसि सन्तोषम् उत्पादयन् लोकप्रकाशकः सूर्यः सर्वदा प्रशोभते।

അരുണസാരഥിയായ സൂര്യൻ മനസ്സുകളെ പ്രചോദിപ്പിച്ചുകൊണ്ട് ചക്രവാളത്തിൽ നിത്യവും ഉദിച്ചുയരുന്നു. അപ്പോൾ പൂക്കൾ വിടരുന്നു. വള്ളികൾ നൃത്തം വയ്ക്കുന്നു, മൃഗപക്ഷിസമൂഹം എങ്ങും ഉണർന്നുചിരിക്കുന്നു.

തന്റെ പ്രകാശത്തെ എങ്ങും പ്രസരിപ്പിച്ചുകൊണ്ട്, ഇരുട്ടിനെ ഇല്ലാതാക്കി എല്ലാത്തിനെയും പവിത്രമാക്കിക്കൊണ്ട് സൂര്യനുദിച്ചു. എല്ലാജീവികളുടെയും മനസ്സിനെ സന്തോഷിപ്പിച്ചുകൊണ്ട് ജഗദ്പ്രകാശകനായ സൂര്യൻ എല്ലായ്പ്പോഴും പ്രശോഭിക്കുന്നു.

## प्रवर्तनम् - 3

**उद्देश्यम् - पदसूर्यस्य पूरणम्।**

**प्रक्रिया :-**

अध्यापकः पदसूर्यस्य चित्रं चार्ट्पत्रे विलिख्य प्रदर्शयतु। यथा

चार्ट्पत्रं दृष्ट्वा पाठपुस्तके दत्तस्य पदसूर्यस्य पूरणाय छात्रान् निर्दिशतु।




## प्रवर्तनम् -4

**उद्देशयम्- चित्रं दृष्ट्वा वाक्यकथनम्।**

**प्रक्रिया**

कविातायाः आशयम् उक्त्वा अध्यापकः त्रिचत्वारिंशत् पुटे विद्यमानानां चित्राणां निरीक्षणाय छात्रान् निर्दिशतु। चित्राणि निरीक्ष्य चित्राणाम् अधोदत्तानि वाक्यानि पठनाय छात्रान् निर्दिशतु। अध्यापकः उचितं साहाय्यं करोतु।

## अनुबन्धप्रवर्तनम्

सूर्योदस्य चित्राणि छात्राः कागदखण्डे रचयन्तु। वर्णलेपनं कुर्वन्तु। अध्यापकः चित्राणि सञ्चित्य सम्पुटमेकं निर्मातु, कक्ष्यायां प्रदर्शयतु।

### सप्तमः पाठः

# राधिकायाः एकं दिनम्

भाषानैपुणीषु भाषणं परमप्राधान्यमर्हति। छात्राः आत्मानमधिकृत्य लघुवाक्यानि वदन्तु। मम नाम...., मम माता...., मम गृहम्.... इत्येवम्। पुनः छात्राः आत्मानमधिकृत्य विशदं वक्तुं प्रभवेयुः। दिनचर्या इत्येकके तदभ्यसनाय अवसरः अस्ति। संख्यापठनाय, वासराणां नामकथनाय दैनिकीरचनायै च पाठेऽस्मिन् अवसरः अस्ति।

पाठस्य नाम : राधिकायाः एकं दिनम्।

कालांशः : 10

उद्देश्यानि : संस्कृते दिनचर्यालेखनम्।
वासराणां, संख्यानाञ्च पठनम्।

नैपुणी : दिनचर्यालेखने सामर्थ्यम्।

| आशयाः/ धारणाः/ व्यवहाररूपाणि | पठनप्रवर्तनानि | पठनाधिगमाः |
|---|---|---|
| आचारेषु प्रथमगणनीया भवति दिनचर्या।<br>छात्रेभ्यः उत्तमदिनचर्या आवश्यकी। | विवरणं पठति।<br>चित्रं दृष्ट्वा संख्यां वदति।<br>दिनदर्शिकां पठित्वा वासराणां नामानि कथयति। | दिनचर्यां लिखति।<br>घटिकां दृष्ट्वा समयं वदति।<br>दिनदर्शिकां दृष्ट्वा वासराणां नामानि कथयति।<br>दैनिकीं लिखति। |

## पाठावतरणम्

पाठावतरणात्पूर्वम् अध्यापकः छात्रैः सह चर्चा नयतु।

चर्चा - कदा उत्तिष्ठति?
उत्थानानन्तरं किं किं कुर्वन्ति?
कदा विद्यालयं गच्छति?

इत्येवमादयः प्रश्नाः पृच्छन्तु। छात्राणाम् उत्तराणि अध्यापकः कोडीकृत्य वदतु। पश्चात् राधिकां परिचयं कुर्मः इत्युक्त्वा पाठभागस्य अवतारणं करोतु। अध्यापकः द्वित्रिवारं पाठपुस्तकं पठतु। छात्राः श्रृण्वन्तु। पुनः अध्यापकः प्रतिवाक्यम् अर्थान् आशयान् च वदतु। अनन्तरम् अध्यापकस्य पठनं श्रुत्वा अनुपठनाय तान् निर्दिशतु। प्रवर्तनमिदं द्वित्रिवारं कृत्वा च कमपि आहूय पाठपुस्तकवाचनाय निर्दिशतु। यथोचितं साहाय्यं अध्यापकः करोतु। सर्वेषां वाचनाय अवसरं कलपयतु।

### प्रवर्तनम् -1

**उद्देश्यम्-कति रुप्यकाणि इति वदतु लिखतु।**

**प्रक्रिया**

अध्यापकः प्रथमं त्रिंशत्पर्यन्तां संख्यां गणयतु। पश्चात् चार्ट्पत्रे ताः संख्याः लिखित्वा प्रदर्शयतु। अध्यापकः ताः संख्याः द्वित्रिवारं गणयतु। पश्चात् छात्रान् चार्ट्पत्रस्य साहाय्येन संख्याः गणयितुं निर्दिशतु। प्रवर्तनमिदं कृत्वा अध्यापकः पुस्तके दत्तानां रुप्यकाणां चित्रदर्शनाय निर्दिशति। चित्रनिरीक्षणानन्तरं चित्रे कति रुप्यकाणि सन्ति इति कथनाय तान् निर्दिशति। छात्राणामुत्तराणि अध्यापकः फलके शोधयित्वा लिखतु। छात्राः फलकं दृष्ट्वा उचितस्थाने संख्याः लिखतु। संख्याः तु दश, विंशतिः, त्रिंशत् च।

### प्रवर्तनम् -2

**उद्देश्यम्-दिनदर्शिकां दृष्ट्वा प्रश्नानाम् उत्तरं वदतु।**

**प्रक्रिया**

अध्यापकः दिनदर्शिकायाः आनयनाय छात्रान् निर्दिशतु। कक्ष्यायाम् अध्यापकः

अपि दिनदर्शिकाम् एकाम् आनयतु। पश्चात् तत्रत्यानि कैरलीवासराणां नामानि एकवारं पठतु। अनन्तरं कागदखण्डे वासराणां संस्कृतनामानि विलिख्य दिनदर्शिकायां वासराणाम् उपरि लेपयतु । पुनः प्रदर्शयतु। प्रवर्तनमिदं कर्तुं छात्रान् निर्दिशतु। तदर्थं छात्रेभ्य कागदखण्डानि ददातु। अध्यापकः यथोचितसाहाय्यं करोतु। छात्रैः लिखितानि कक्ष्यायां प्रदर्शयतु। दिनदर्शिकां दृष्ट्वा तत्र रविवासरे के के दिनाङ्काः इति निरीक्ष्य कथानाय निर्दिशति। एवं रक्तवर्णाङ्किततानि दिनानि कानि? शिष्टानि दिनानि कति इति प्रश्नानाम् उत्तराणि वक्तुं प्रेरयतु। पश्चात् वासराणां नामकथनाय अपि छात्रान् प्रेरयतु।

प्रश्नानाम् उत्तराणि तावत्

1. 2, 9,16, 23, 30 दिनानि रविवारे सन्ति।

2. पूर्वोक्तानि दिनानि, अधिकतया दिनाङ्कं च रक्तवर्णाङ्कितानि।

3. शिष्टानि दिनानि चतुर्विंशतिः।

**अनुबन्ध प्रवर्तनानि (1)**

अध्यापकः चार्ट्पत्रं वृत्राकारेण कर्तयित्वा घटिकानिर्माणं करोतु। कक्ष्यायां प्रदर्शयतु। छात्राः अपि प्रवर्तनमिदं कुर्वन्तु। तदर्थं वृत्राकोरण चार्ट्पत्राणि कर्तनाय अध्यापकः साहाय्यं करोतु। छात्रैः निर्मिताः घटिकाः कक्ष्यायां प्रदर्शयन्तु। एतां खडिकामुपयुज्य अध्यापकः संख्याबोधनं करोतु। अध्यापकः स्वस्य दिनचर्यां वदतु। पश्चात् छात्राणां दिनचर्यां कथनाय द्वित्रान् निर्दिशतु।

(2) पाठपुस्तकस्य साहाय्येन स्वस्य दिनचर्यालेखनाय अध्यापकः छात्रान् निर्दिशतु। यथोचितं साहाय्यं करोतु। लिखितानि अध्यापकः शोधयित्वा टिप्पणीपुस्तके लेखनाय निर्दिशतु।

# चतुर्थम् एककम्

# ¸ÉÊiÉ ÉVÉ®ÉÉ

अस्मिन्नेकके श्रुतिमधराः चत्वारः पाठाः निबद्धाः सन्ति।

प्रथमपाठे श्रुतिमधुराणि ललितानि चत्वारि सुभाषितानि दत्तानि। पुनश्च कृषकस्य कौशलमिति प्रसिद्धा कथा, अनन्तरं भगवद्गीतायाः उद्धृताः त्रयः श्लोकाः, अन्ते नष्टमनोरथः इति मनोरञ्जिका एका सचित्रकथा च सङ्कलिताः।

चतुर्भिरपि पाठैः आह्लाददायकाः बहवः पठनानुभवाः दातुं शक्यन्ते। तदनुरूपाणि भवन्तु पठनप्रवर्तनानि। तैश्च संस्कृतं प्रति छात्राणाम् आभिमुख्यं द्विगुणीभवन्तु।

**पठनाधिगमाः**

* सुभाषितानि पठित्वा आशयमवतारयति।
* सुभाषितानि चित्वा सम्पुटं रचयति।
* चित्राणि दृष्ट्वा कथां वदति।
* कथाः मातृभाषया वदति लिखति च।
* चित्राणि क्रमीकृत्य कथां लिखति।
* गीताश्लोकान् सतालम् आलपति।
* श्लोकानामाशयं वदति लिखति च।
* कथां भावात्मकतया अवतारयति।
* चित्रसाहाय्येन वाक्यानि पठित्वा कथां क्रमीकरोति।
* पदानामर्थान् शब्दकोशात् चित्वा लिखति।

### अष्टमः पाठः

# सुभाषितानि

## आमुखम्

संस्कृतकाव्यपठने प्रायेण प्रथममागच्छन्ति सुभाषितानि। संस्कृतकाव्यसागरे मौक्तिकमिव विलसन्ति सुभाषितानि। लालित्येन, माधुर्येण, आशयसौष्ठवेन च सुभाषितानि काव्यास्वादकानां तथा सामान्यजनानामपि श्रद्धां आकर्षयन्ति। सुष्ठु भाषितम् अथवा शोभनं भाषितं सुभाषितम् इति नाम्ना एव सुभाषितस्य स्वभावः स्पष्टः। सुभाषिते प्रायेण जीवनोपकारकः एकः सन्देशः भवेत्। वैरस्यं विना सदुपदेशान् प्रदास्यन्ति सुभाषितानि। मुक्तकानि सुभाषितानि पठित्वा अस्माकं मनसि तानि चिरस्थायीनि भवन्ति। अनेन छात्राणां भाषास्वाधीनं वर्धते। भाषाप्रयोगसौलभ्यं सुभाषितपठनस्य एकं सविशेषप्रयोजनं भवति।

पाठनाम - सुभाषितानि।

कालांशाः - 15

उद्देश्यम् - काव्यास्वादनम् । शीलरूपवत्करणम्।

नैपुणीः - रागताललयसमन्वितम् आलपनम्। आशयग्रहणम्।

| आशयः/ धारणाः/ व्यवहाररूपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| **सूभाषितम्**<br>1. लोके सुखं दुःखं वा चिरं न तिष्ठति।<br>2. उचितं कर्म उचितसमये उचितस्थाने कर्तव्यम्।<br>3. विद्याविहीनः परमार्थं ज्ञातुमशक्त एव। | 1. श्रद्धया श्रवणम्।<br>2. श्रुत्वा आलपनम्।<br>3. संघशः आलपनम्।<br>4. व्यक्तिगतम् आलपनम्।<br>5. आशयमधिकृत्य चर्चा।<br>6. सुभाषितानाम् सञ्चयनम्। | 1. सुभषितानां माधुर्यम् आस्वदते।<br>2. ताललयसमन्वितम् आलपति।<br>3. सुभाषितानाम् आशयं वदति।<br>4. सुभाषितानि सञ्चिनोति |

अतीव ललितानि कानिचित् सुभाषितान्येव पाठभागेऽस्मिन् दत्तानि। कठिनपदानि न सन्ति। आशयश्च स्पष्टः।

## पठनप्रवर्तनानि।

### प्रवर्तनम् 1

### उद्देश्यम्- सस्वरं सुभाषितालपनम्।

### प्रक्रिया :-

सुभाषितपठने प्रथमं तावत् आलापनस्यैव प्राधान्यम्। बहुवारं भिन्नरीत्या आलापनं कृत्वा सुभाषितं हृदिस्थं भवति चेत् पुनः आशयग्रहणं सुकरं भवति।

प्रथमं तावत् अध्यापकः सुभाषितं सस्वरं स्पष्टञ्च आलपति। छात्राः केवलं श्रद्धया श्रृण्वन्ति। अनन्तरम् अध्यापकः एकैकं पादम् आलपति। छात्राः श्रुत्वा अनुगायन्ति। पुनश्च एकैकः संघः मिलित्वा आलपति। तदनन्तरम् एकैकः छात्रः आलपति। अनन्तरम् अध्यापकः आशयग्रहणाय छात्रान् प्रचोदयति। अत्र अध्यापकसाहाय्येन छात्राः एव आशयं वदन्तु। यथा - अध्यापकः श्लोकस्य गद्यक्रमं वदति छात्राः आशयं वदति।

### अन्वयक्रमः यथा-

सुखस्य अनन्तरं दुःखम्। दुःखस्य अनन्तरं सुखम्। नित्यं दुःखं न लभते। नित्यं सुखं न लभते।

### प्रवर्तनम् 2

### उद्देश्यम्- सुभाषितानामाशयग्रहणम्।

### प्रक्रिया :-

अध्यापकः सुभाषितानामाशयं वदति। जीवने सुखं दुःखं वा न चिरस्थायि। केषुचित् विषयेषु दीर्घकालं सुखम् अथवा दीर्घकालं दुःखं वा भवेत्। किन्तु सर्वकालं सुखं वा सर्वकालं दुःखं वा भवितुं नार्हति। अत्र एवं प्रपञ्चसत्यं विज्ञापयति।

दुःखितानां समाश्वासदायकं भवति सुभाषितमिदम्।

സുഭാഷിതത്തിന്റെ സാരം:-

## सुभाषितम् - 1

### आशयः -

ജീവിതത്തിൽ സുഖത്തെ തുടർന്ന് ദുഃഖവും ദുഃഖത്തെ തുടർന്ന് സുഖവും മാറിമാറി വരുന്നതായി കാണുന്നു. അല്ലാതെ ആർക്കും ജീവിതകാലം മുഴുവൻ ദുഃഖമോ സുഖമോ സ്ഥിരമായി കാണുന്നില്ല. ജീവിതത്തിൽ സുഖദുഃഖങ്ങൾ മാറി മാറിവരുമെന്നും ദുഃഖം വരുമ്പോൾ പ്രതീക്ഷ നഷ്ടപ്പെട്ട് വല്ലാതെ ദുഃഖിക്കുകയും സുഖം വരുമ്പോൾ അമിതമായി സന്തോഷിക്കുകയും ചെയ്യരുതെന്നു സാരം.

## सुभाषितम् - 2

प्रयोजनमनुद्दिश्य किमपि न कर्तव्यमिति उपदिशति सुभाषितमिदम्।

समुद्रेषु वृष्टिः वृथा, एवं तृप्तेषु भोजनं वृथा, धनाढ्येषु दानं वृथा, दिवा दीपो वृथा। श्लोकस्य अर्थः स्पष्टः इत्यस्मात् आशयं वक्तुं छात्राः प्रभवन्ति। तदर्थम् अध्यापकेन छात्राः प्रेरितव्याः।

समुद्रे वृष्टिः वृथा - अस्य कारणं छात्राः वदन्तु।

समुद्र एव वृष्टेः प्रभवस्थानम् । तत्र वर्षणेन प्रयोजनं नास्ति।

तृप्तेषु भोजनं वृथा ।

तृप्तिपर्यन्तं भोजनं कर्तुं शक्यते । किन्तु तृप्तिं प्राप्य पुनः भोजनेन न प्रयोजनम्। तस्मात् तृप्तेषु भोजनं वृथा भवति।

धनाढ्येषु दानं वृथा। निर्धनेभ्यः दानम् उचितमेव । धनिकानां कृते दानं निरर्थकम्। दिवा दीपः वृथा। अन्धकारे प्रकाशस्य कृते दीपं प्रज्वालयति। दिवा सूर्यप्रकाशे संस्थिते दीपप्रज्वालनं व्यर्थम् ।

## सुभाषितम् - 3

चिन्तनीया हि.... इत्यस्मिन् सुभाषिते करणीयानि उचितसमय एव कर्तव्यानीति उद्बोधयति सुभाषितमिदम्।

विपदामादावेव प्रतिक्रिया चिन्तनीया। आपदि समागते तस्य प्रतिरोधोपायं चिन्तयित्वा प्रयोजनं नास्ति। आशयेऽयम् एकेन उदाहरणेन समर्थयति न कूपखननमिति। वह्निना गृहे प्रदीप्ते सति जलमादातुं कूपखननम् अनुचितमेव। अर्थात् आपदां साध्यता पूर्वमेव संभाव्य तन्निवारणोपायः चिन्तनीयः। आपदि सम्प्राप्ते प्रतिरोघचिन्तन अनुचितमेव।

## सुभाषितम् - 4

दिवा पश्यति नोलूक.... इत्यादि -

अन्वयः -उलूकः दिवा न पश्यति। काकः नक्तं न पश्यति।
विद्याविहीनः मूढः तु दिवा नक्तं च न पश्यति।

उलूकस्य दिवा , काकस्य रात्रौ दर्शनशक्तिः नास्तीति प्रसिद्ध एव। विद्याविहीनः मूढस्तु नेत्रयुक्तोऽपि दिवा नक्तं च याथार्थ्यं न पश्यति।

विद्याभ्यासेन अज्ञानतिमिरं नश्यति। अज्ञानां विषये लोकोऽयम् अन्धकारमयमिव भाति इत्याशयः। उलूकः दिवा न पश्यति। तथापि नक्तं सर्वं पश्यतीति विशेषता अस्ति। तथा काकः यद्यपि नक्तं न पश्यति। तथापि दिवा सम्यक् पश्यति। विद्याविहीनः दृष्ट्वा अपि अवगन्तुं न शक्यते इति परिमितिः अस्ति। अस्मिन् श्लोके विद्यायाः महत्वं सम्यक् प्रतिपादयति।

## पठनप्रवर्तनानि

1. सुभाषितानां भिन्नप्रकारेण आलपनं प्रधानमिति अन्यत्र सूचितम्।
2. एकैकस्य सुभाषितस्य आशयप्रतिपादनसमये चर्चा कार्या। सुभाषितानाम् आशयं यथा छात्राः स्वयमेव अवगच्छन्ति तथा चर्चां नेतुमर्हति अध्यापकः।
3. सुभषितानि सर्वाणि पठित्वा तेषु इष्टतमं सुभाषितं छात्रा; स्वयमेव प्रत्यभिज्ञानन्तु। तस्य कारणञ्च प्रतिपादयन्तु।

## अनुबन्धः
## सुभाषितमाहात्म्यम्

पृथिव्यां त्रीणि रत्नानि
जलमन्नं सुभाषितम्।

मूढैः पाषणखण्डेषु
रत्नसंज्ञा विधीयते।

जीवने अविभाज्यघटके भवतः जलम् अन्नञ्च। तादृशं प्राधान्यं कल्पितं सुभाषितस्यापि जलम् अन्नं च शरीरेण सम्बद्धम् सुभाषितन्तु मनसः परिपोषकमिति यावत्।

**प्रवर्तनम् -3**

**उद्देश्यम्- इष्टतमस्य सुभाषितस्य चयनम्।**

**प्रक्रिया :-**

अध्यापकः चतुर्णामपि सुभाषितानामाशयं वर्गे मातृभाषया अवतरति। तेषु इष्टतमं सुभाषितं किमिति छात्रान् पृच्छतु। केचन छात्राः प्रथमस्य, केचन छात्राः द्वितीयस्य इतरे तृतीयस्य, अन्ये केचन चतुर्थस्य च सुभाषितस्य चयनं कुर्वन्ति। तस्य कारणं किमिति अध्यापकः पृच्छति। छात्राः तस्य चयनस्य कारणं वदति। अन्ते अध्यापकः संक्षिप्य वदति। श्यामफलके लिखति च।

संक्षेपः एवं प्रकारं स्यात्।

- जीविते सुखं दुःखं च सदा न वर्तते इति याथार्थ्यम् अवगच्छति प्रथमे सुभाषिते।
- साधूदाहरणैः निष्फलस्य कर्मणः कार्यं सूचयति द्वितीये सुभाषिते।
- प्रथमं चिन्ता करणीया। अनन्तरं कर्मकारणं तृतीये सुभाषिते।
- विद्याविहीनः मूढः नक्तं दिवा च न पश्यति। सः अगाधे अन्धकारे भवति इति चतुर्थे सुभाषिते।

**प्रवर्तनम्-4**

**उद्देश्यम्- सुभाषितसम्पुटनिर्माणम्।**

**प्रक्रिया :-**

अध्यापकः वर्गे आगत्य भो छात्राः युष्माभिः पूर्वं पठितानि सुभाषितानि स्मर्यन्ते वा इति पृच्छति। एकैकः छात्राः न्यूनातिनूनमेकं सुभाषितं लिखित्वा आनयनाय प्रेरयति। एकैकः वर्गे अवतरतु। अध्यापकः स्खालित्यानि परिहरति। आवर्तनं विना अध्यापकः फलके लिखति। छात्राः सर्वाणि सुभाषितानि विलिख्य एकैकं सम्पुटं रचयन्तु।

**प्रवर्तनम् 5**

**उद्देश्यम्- दानविषये चर्चा।**

**प्रक्रिया :-**

सुभाषितानां पाठनान्तरं दानस्य महत्वमधिकृत्य चर्चां कर्तुं छात्रान् संघस्थान् करोतु। प्रतिसंघं चर्चां कर्तुं छात्रान् संघस्थान् करोतु। प्रतिसंघं चर्चां कृत्वा सङ्घादेकः अवतरतु। प्रादेशिकभाषायामेव छात्राः वदन्तु। अध्यापकः क्रोडीकृत्य संस्कृते फलके लिखतु।

तद्यथा -

1. मानवगुणेषु अन्यतमः भवति दानम्।

2. यः दानं करोति तस्य मनसः तृप्तिः जायते।

3. दानस्वीकर्ता दानेन तुष्यति।

4. होमे अर्पितं होमद्रव्यं दानं च  कदापि न नश्यतीति भासकविः।

5 धनाढ्येभ्यो दानं न कार्यम्।

6. उचिते पात्रे एव दानं कार्यम्।

### नवमः पाठः

# कृषकस्य कौशलम्

## आमुखम्

पाठेनानेन कथा नाम व्यवहाररूपं परिचिनोति। कथाश्रवणे वाचने कथने च छात्राः तत्पराः भवन्ति। कथा चित्रैस्सहिता चेत् अतीव हृद्या भवेत्।

कैरल्यां प्रथिता एका कथा अत्र बहुभिः चित्रैस्सह संगृह्य दत्ता अस्ति। सा बालेभ्यः रोचकं भवेन्नूनम्।

पाठस्य नाम - कृषकस्य कौशलम्।

कालांशः - 16

नैपुणी - कथास्वादननैपुणी, कथाकथनतात्पर्यम्, कथावाचनोत्सुकता।

| आशयः/ धारणाः/ व्यवहाररूपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| कथा | 1. आदर्शवाचनश्रवणम्।<br>2. कथामधिकृत्य चर्चा।<br>3. कथापात्राण्यधिकृत्य चर्चा, स्वभावनिरूपणम्।<br>4. कथास्तम्भस्य क्रमीकरणम्। | 1. श्रद्धया श्रृणोति।<br>2. कथामधिकृत्य चर्चां करोति।<br>3. कथापात्रानिरूपणं करोति।<br>4. कथाघटनां क्रमेण वदति। |

## प्रवर्तनम्-1

### उद्देश्यम्- गद्यवाचनम्।

### प्रक्रिया

कक्ष्यायाः बहिः संस्कृतश्रवणाय अवसरः विरलाः इत्यस्मात् अध्यापकेन तदर्थम् अवसराः कल्पनीयाः।

पाठपुस्तकस्थकथायाः वाचनात्पूर्वं तां कथां लघुलघुवाक्यैः चित्राणां साहाय्येन वदति चेत् तत् छात्रेभ्यः अभिप्रेरणादायकं भवेत्। चित्राणां प्रतिकृतयः पाठपुस्तकादेव स्वीकृत्य कार्ड्पत्रे, चार्ट्पत्रे वा स्थापयित्वा कथा वक्तव्या। कथाकथनावसरे मध्ये मध्ये लघुप्रश्नान् पृष्ट्वा छात्राणां श्रवणकौतुकं उद्दीपयितुमर्हति।

कथाकथनानन्तरं पुस्तकस्थां कथां वाचयतु अध्यापकः। द्विवारम् आदर्शवाचनं कृत्वा संघवाचनाय छात्रान् प्रेरयतु। अनन्तरं व्यक्तिगतवाचनाय निर्दिशतु। वाचनावसरे स्खलित्यानि परिहरणीयानि।

## प्रवर्तनम् -2

### उद्देश्यम्- कथायाः आशयावगतिः।

### प्रक्रिया

छात्राः नूतनपदानि सञ्चित्य लिखन्तु। शब्दकोशं निरीक्ष्य अर्थकथनाय लेखनाय च अवसरः दातव्यः। अध्यापकः पदानामर्थनिर्देशपूर्वकं मातृभाषायामाशयं विशदयति।

## प्रवर्तनम् 3

### उद्देश्यम्- चित्राणां साहाय्येन कथाक्रमीकरणम्।

चित्राणां साहाय्येन कथांशान् क्रमीकृत्य लिखतु। अध्यापकस्य निर्देशानुसारं छात्राः कथांशान्, क्रमीकृत्य लिखन्ति। अध्यापकः परिशोधयति। आवश्यकं चेत् साहाय्यं अपि ददातु।

कथांशान् क्रमीकृत्य अधः दत्तम् -

कृषकः भार्या च चोराणां संभाषणं शृणुतः।
कूपे पेटिकां निक्षिपति।
कूपात् जलं शोषयन्ति।
पेटिकायां शिलाखण्डानि पश्यन्ति।

लेखनात् पूर्वं छात्राः कथांशान् क्रमीकृत्य वदन्तु। अध्यापकः फलके लिखित्वा प्रदर्शयतु। अनन्तरं छात्राः अङ्कन्या पुस्तके लिखन्तु।

## प्रवर्तनम् -4

## उद्देश्यम्- कथामधिकृत्य चर्चा।

## प्रक्रिया

कथां पठित्वा एकाम् आस्वादनचर्चा आयजनीया। छात्राः इष्टांशान् सूचयन्तु। कथापात्राण्यधिकृत्य वदन्तु। कथायाः सन्देशमधिकृत्यापि ते स्वाभिप्रायान् प्रकटयन्तु। अध्यापकः तानभिप्रायान् क्रोडीकृत्य फलके लिखति। छात्राः स्वस्यपुस्तकेषु लिखन्तु। तद्यथा-

"गोपालः बुद्धिमान् भवति। सः स्वचिन्तां भार्यां वदति। अतः तया सह सः भाषाणखण्डान् पेटिकायां पूरयति। 'धनपूर्णांपेटिकां पूर्वे निक्षिपावः' इति उच्चैः वदति। चोराः तस्य वचनं 'धिम्' इति शब्दं च श्रुत्वा पूर्वं परिशोषयन्ति। अत्रान्तरे सः जलेन वृक्षान् सिञ्चति। चोराः अन्ते लज्जिताः अभवन्। प्रतिनिवृत्ताः च। गोपालस्य कौशलमुचितमेवासीत्"।

## प्रवर्तनम् 5

## उद्देश्यम्- क्रियापदानाम् उचितस्थाने योजनम्।

## प्रक्रिया

अध्यापकः पाठभागस्थानि चित्राणि दृष्ट्वा उचितस्थानेषु क्रियापदानि प्रयोक्तुं छात्रान् निर्दिशतु। छात्राः चित्राणि वीक्ष्य चलति - त्रायति- इत्यादीनां पदानामर्थं च ज्ञात्वा चित्राणामधो भागे लिखन्ति। अध्यापकः परिशोधयति। मूल्यनिर्णयं करोति। स्खालित्यानि सन्ति चेत् परिहरति।

उत्तराणि तु प्रथमश्रेण्याम्- गायति, पठति, क्रीडति च।

द्वितीयश्रेण्याम्- चलति, नृत्यति च।

## प्रवर्तनम् 6

## उद्देश्यम्- कथां सम्भाषणरूपेण मातृभाषायावतरणम्।

## प्रक्रिया

अध्यापकः कथामिमां सम्भाषणरूपेण मातृभाषया अवतारयितुं छात्रान् निर्दिशतु। तदर्थं पर्याप्तं साहाय्यं ददातु। छात्राः संघे स्थित्वा चर्चां कृत्वा प्रतिसङ्घम् अवतरन्तु। अध्यापकः क्रोडीकृत्य वदतु। पुनः फलके लिखतु। क्रोडीकृतं रूपं तावत्।

(കള്ളന്മാരിൽ ഒരാൾ നേതാവാകുക) - ഇന്ന് നമുക്ക് ഗോപാലിന്റെ വീട്ടിൽ കയറി മോഷ്ടിക്കാം അവൻ ധനികനാണ്.

കള്ളന്മാരിൽ ഒരാൾ (അനുയായി)- ശരി, ധാരാളം ധനം അവിടെ ഉണ്ടാകും.

വീട്ടിനുള്ളിൽ നിന്നും ഗോപാലൻ - (ഭാര്യയോട് രഹസ്യമായി) നീ കേട്ടില്ലേ കള്ളന്മാർ പറയുന്നത്.

ഭാര്യ- കേട്ടു, നാം എന്തു ചെയ്യും?

ഗോപാലൻ - ഉപായമുണ്ട് നമ്മുടെ വലിയ പെട്ടിയിൽ കുറേ കല്ലുകൾ നിറച്ച് കിണറ്റിൽ ഇടാം

ഭാര്യ - എന്തിന്?

ഗോപാലൻ - ശബ്ദം കേട്ട് അവർ കിണർ വറ്റിക്കുവാൻ നോക്കും (ഉറക്കെ)

ഗോമതീ ......ഇവിടെ കള്ളന്മാർ ഉണ്ട് നമ്മുടെ ധനമെല്ലാം പെട്ടിയിൽ നിറച്ച്

കിണറ്റിലിടാം

ഭാര്യ - ഓ അങ്ങനെയാകട്ടെ

(ഗോപാലനും ഭാര്യയും കൂടി പെട്ടി കിണറ്റിലിടുന്നു. )

കള്ളന്മാരുടെ നേതാവ്- കേട്ടില്ലേ കിണറ്റിനുള്ളിൽ നിന്ന് ഒരു ഭയങ്കരശബ്ദം

അനുയായി അവൻ ധനം നിറച്ചപെട്ടി കിണറ്റിലിട്ടതാവാം

നേതാവ് - ആവട്ടെ, നമുക്ക് അത് എടുക്കണം.

അനുയായി- അതെങ്ങനെ?

നേതാവ് -വെള്ളമെല്ലാം കോരി. കിണർ വറ്റിച്ച് പെട്ടി പൊക്കിയെടുക്കണം

അനുയായി - പ്രയാസമുള്ള ജോലിയാണ്

നേതാവ് - അതെ, ജോലിചെയ്യാതെ എങ്ങനെ കാര്യം സാധിക്കും?

അനുയായി - ആകാം

(മറ്റൊരു ഭാഗം)

ഗോപാലൻ - (ഭാര്യയോട്) ഞാൻ ചെന്ന് വെള്ളം തിരിച്ചുവിടട്ടെ തോട്ടത്തിലെ വിളകൾക്ക് നനവുകിട്ടുമല്ലോ (പുറത്തേക്കിറങ്ങി തോട്ടത്തിലെ വിളകൾക്ക് കിട്ടാൻ പാകത്തിൽ വെള്ളം തിരിച്ചു വിടന്നു.)

കള്ളന്മാരുടെ നേതാവ് - പെട്ടികിട്ടാതായോ?

അനുയായി - വെള്ളമെല്ലാം കോരി വറ്റിച്ചു. പെട്ടിയെടുക്കുവാൻ ശ്രമിക്കുകയാണ്, ഭവാൻ കൂടി സഹായിക്കൂ.

നേതാവ്- അങ്ങനെയാകട്ടെ

അനുയായി ആവൂ..., ആശ്വാസമായി

ഇതാ പെട്ടി

നേതാവ് - തുറക്കെടോ!

അനുയായി - പ്രയാസമുള്ള ജോലിയാണ് അത്

ആകട്ടെ (തുറന്നിട്ട്)- അയ്യോ! ഇതെന്താണ്? പാറക്കല്ലുകളോ?

നേതാവ് - ങേ? കഷ്ടം! ആ കള്ളൻ ഗോപാലൻ നമ്മെ പറ്റിച്ചുവല്ലൊ. എന്തായാലും ആരും കാണാതെ നമുക്ക് രക്ഷപ്പെടാം നേരം വെളുക്കാറായി.

(അവർ ലജ്ജിച്ച് പോകുന്നു)

### दशमः पाठः

# गीतामृतम्

## आमुखम्

भगवद्गीता महाभारते भीष्मपर्वणि अन्तर्भूता। युद्धभूमौ स्वकर्मविमुखम् अर्जुनम् उपदिशति श्रीकृष्णः।

भगवद्गीतान्तर्भूतं पद्यत्रयं पाठभागे दत्तमस्ति। पद्यान्येतानि कर्मणः प्राधान्यमुद्घोषयन्ति।

अस्मिन् पाठभागे दत्तानां श्लोकानां वैशद्येन पठनं न उद्दिष्टम् । गीताश्लोकानां परिचयसम्पादनार्थं दत्तानामेतेषां समुचितमालपनं प्राधान्येन कर्तुमर्हन्ति छात्राः।

अध्यापकः स्वयमेव गानं कृत्वा अथवा आधुनिकोपकरणानां साहाय्येन वा श्लोकानाम् आलापनरीतिं परिचाययतु।

पाठस्य नाम - गीतामृतम्।

कालांशः - 11

उद्देश्यम् - श्लोकानां समुचितमालापनम्।

नैपुणी - श्लोकालपनसामर्थ्यम्।

| आशयः/ धारणाः/ व्यवहाररूपाणि | पठनप्रवर्तनानि/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| 1. काव्यम् (श्लोकाः)।<br>2. श्लोकालपनप्रकारः। | 1. आलपनश्रवणम्।<br>2. श्रुत्वा आलपनम्।<br>3. संघशः एकैकशश्च आलपनम्।<br>4. व्यक्तिगतम् आलपनम् । | 1.गीताश्लोकपरिचयं सम्पादयति।<br>2.श्लोकालपनरीतिं ज्ञात्वा आलपति। |

श्लोकानां सविस्तरपठनं चतुर्थकक्ष्यायां न उद्दिष्टम्। तथापि श्लोकानाम् आशयतत्पराणां कृते वक्तुमर्हति। श्लोकानाम् अन्वयः अर्थः च अधः दीयते।

1. कायेन मनसा बुद्ध्या
केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति
सङ्गं त्यक्त्वात्मशुद्धये।

अन्वयः योगिनः सङ्गं त्यक्त्वा आत्मशुद्धये कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि कर्म कुर्वन्ति।

सारांशः-

യോഗികൾ നിസ്സംഗരായി അവരവരുടെ കർമം (പരപ്രേരണ കൂടാതെ) ശരീരം കൊണ്ടോ മനസ്സുകൊണ്ടോ ബുദ്ധികൊണ്ടോ, കേവലമായ ഇന്ദ്രിയങ്ങൾകൊണ്ടോ അനുഷ്ഠിക്കുന്നു.

2. असंशयं महाबाहो !
मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय !
वैराग्येण च गृह्यते।।

हे महाबाहो ! मनः दुर्निग्रहं चलं च इति संशयम्। हे कौन्तेय ! (तत्तु) अभ्यासेन वैराग्येण च गृह्यते।

सारांशः-

മനസ്സ് ചഞ്ചലവും ഗ്രഹിക്കാൻ പറ്റാത്തതുമാണെന്നതിന് സംശയമില്ല. അതിനെ ആകട്ടെ ഹേ കൗന്തേയ! അഭ്യാസം കൊണ്ടും വൈരാഗ്യം കൊണ്ടും ഗ്രഹിക്കാൻ സാധിക്കും.

3. कर्मण्येवाधिकारस्ते
मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः
मा ते सङ्गोऽस्त्वऽकर्मणि।।

ते कर्मणि एव अधिकारः। फलेषु कदाचन मा (अधिकारः) । त्वं कर्मफलहेतुः मा भूः। ते अकर्मणि सङ्गः मास्तु।

നിനക്ക് കർമത്തിൽ മാത്രമാണ് അധികാരം കർമഫലത്തിൽ ഒരിക്കലും അധികാരമുണ്ടാകരുത്. കർമഫലം നിന്റെ കർമത്തിന് (ഒരിക്കലും) ഹേതുവാകരുത്. കർമം ചെയ്യാതിരിക്കുന്നതിലും നിനക്ക് താത്പര്യമുണ്ടാകരുത്.

## प्रवर्तनम् 1

## उद्देश्यम्- श्लोकानां सतालमालपनम्।

## प्रक्रिया

अध्यापकः श्लोकानां तालानुसारम् आदर्शवाचनं करोतु। एकैकस्य श्लोकस्य एकैकं पादम् इति क्रमेण पारायणं करोतु। छात्राः अनुगायन्तु। एवं सर्वेषां श्लोकानां पारायणं कार्यम्। पुनः छात्रान् सङ्घं कृत्वा पारायणाय प्रेरयतु। अवश्यं साहाय्यमध्यापकेन देयम्।

## प्रवर्तनम् 2

## उद्देश्यम् - परिचितानां पदानां चयनम्।

## प्रक्रिया :-

अध्यापकः अस्मिन् पाठभागे वर्तमानानि, छात्रैः परिचितानि च पदानि स्वस्वपुस्तिकासु छात्रान् लेखितुं प्रेरयन्तु। तानि स्वस्वपुस्तिकासु छात्राः लिखन्तु। अध्यापकः तानि पदानि परिशोद्ध्य शिष्टानां पदानाम् अर्थान् वदतु। पदच्छेदं फलके विलिख्य वाचनाय प्रेरयतु।

## एकादशः पाठः

# नष्टमनोरथः

### आमुखम्

छात्राः प्रायेण कथाश्रवणतत्पराः । अतीतकक्ष्यासु बहवः कथाः तैः श्रुताः। तेषां कथाश्रवणकौतुकम् उपयुज्य संस्कृतभाषाश्रवणाय अवसरः दातव्यः। स एव अस्य पाठस्य प्रथमोद्देश्यम्।

श्रुत्वा श्रुत्वा उक्त्वा उक्त्वा एव भाषासमार्जनं सम्भवति। संस्कृतभाषाश्रवणे अन्ये अवसराः विरलाः इत्यस्मात् अध्यापकेनैव संस्कृतभाषणं कार्यम्। तदर्थं स्वीकरणीयः समुचितः मार्गः भवति कथाकथनम्।

उद्देश्यम् - कथा नाम व्यवहाररूपेण संस्कृतभाषायां श्रवणम्।
- कथाश्रवणकौतुकोद्दीपनम्।
- कथापात्रस्वभावनिरूपणम्।
- कथायाः सन्देशाधिगमः।
- कथाकथने तात्पर्योत्पादनम्।
- कथारचनायां तात्पर्योत्पादनम्।

कालांशः - 10

## प्रवर्तनम् 1

## उद्देश्यम्- पाठावतरणं विशदीकरणं च।

### प्रक्रिया

पुस्तकस्थां कथां चित्रसाहाय्येन लघुलघु वाक्यैः वदतु अध्यापकः। पाठपुस्तकस्थानि चित्राणि चार्ट्पत्रे अथवा कार्ड्पत्रे विलिख्य मध्ये प्रदर्शयति चेत् समुचितं भवेत्। पाठपुस्तके दत्तानि वाक्यानि एव उपयुज्य कथां वक्तुं शक्यते। उचितसन्दर्भेषु लघुप्रश्नान् पृष्ट्वा कथयति चेत् अधिकम् आकर्षकं भवेत्। एवं कथां पूर्णतया उक्त्वा पुनः पाठपुस्तकस्य उद्घाटनमुचितम् । अध्यापकः प्रथमं तावत् कथां वाचयतु। वाचनसमये छात्राणां नयनानि अक्षरोपरि सञ्चरन्तु। द्वित्रिवारं कथां वाचयित्वा अनुवाचयितुं छात्रेभ्यः अवसरं दातव्यः। पुनश्च व्यक्तिगतवाचनाय अवसरः दातव्यः।

चित्रे किं पश्यन्ति?

पाठपुस्तकस्थानि चित्राणि एकैकं प्रदर्श्य तत्संबद्धान् प्रश्नाान् पृष्ट्वा उत्तराणि वक्तुम् अवसरं ददातु।

यथा - प्रथमचित्रे किमस्ति?<br>
कः आगच्छति?<br>
तस्य शिरसि किमस्ति?

## प्रवर्तनम् 2

## उद्देश्यम्- कथानुसारं वाक्यानां क्रमीकरणम्।

### प्रक्रिया

पाठपुस्तकस्थानि पठनप्रवर्तनानि। पञ्चचित्राणि दत्तानि कथागतिमनुसृत्य चित्राणां क्रमीकरणमेव कर्तव्यम् प्रवर्तनमिदं कार्ड्चित्राणां साहाय्येन कर्तुमुचितम्। चित्राणि वाक्यानि च प्रत्येकं कार्ड्पत्रे लिखित्वा। छात्रेभ्यः देयानि । छात्राः कथां निर्दिष्टस्थाने स्थापयन्तु। स्खालित्यानि परिहरतु अध्यापकः।

## प्रक्रिया 3

### उद्देश्यम् - अन्यत् शीर्षकम्।

### प्रक्रिया :

नष्टकलशः दरिद्रः पुनः किम् अकरोत्? स्वभावनामधिकृत्य एकैकः वदतु। छात्राः कैरल्यां वदन्तु। अध्यापकः संस्कृते अनूद्य फलके लिखतु। 'दिवास्वप्नः'। 'स्वप्नेन न कार्यम्'। 'कर्मकरणमेव वरम्' इत्यादिषु अन्यतममस्तु।

## प्रवर्तनम् 4

### उद्देश्यम्- प्रादेशिकभाषया अस्याः कथायाः कथनं कथासन्देशमधिकृत्य चर्चा च।

### प्रक्रिया :-

अध्यापकः पाठं पाठयित्वा कथां प्रादेशिकभाषया वक्तुं सङ्घस्थान् छात्रान् प्रेरयतु। प्रतिसङ्घम् एकैकः कथां वदति। अन्ते अध्यापकः कथां क्रोडीकृत्य संक्षिप्य च फलके लिखति। छात्राः स्वस्वपुस्तिकासु लिखन्तु।

कथा-यथा-മലർപ്പൊടിക്കാരന്റെ ദിവാസ്വപ്നം എന്ന് പറയാവുന്ന കഥയാണിത്. ഗ്രാമത്തിൽ ദരിദ്രനായ അവന് കുറെ മലർപൊടി കിട്ടുന്നു. ആ മലർപൊടി ഉറിയിൽ തൂക്കി കിടക്കയിൽ കിടന്ന് ഉറങ്ങി. ദിവാസ്വപ്നത്തിൽ ഇപ്രകാരം കാണുന്നു. ഈ മലർപൊടി വിറ്റ് ധനം സമ്പാദിക്കും. ആ ധനത്താൽ ആടിനെ വാങ്ങുന്നു. കാലക്രമത്തിൽ അത് ആട്ടിൻകൂട്ടമാകുന്നു. പിന്നീട് പശുക്കളെ വാങ്ങുന്നു. പിന്നീട് പശുക്കൂട്ടമാകുന്നു. പശുക്കൂട്ടത്തിനെ വിറ്റ് കുതിരയെ വാങ്ങുന്നു. ക്രമേണ കുതിരകളുടെ കൂട്ടമാകുന്നു. അവകളെ വിറ്റ് വലിയ ധനികനാകുന്നു. വലിയവീട് നിർമ്മിച്ചിട്ട് ഒരു പ്രഭുകുമാരിയെ വിവാഹം ചെയ്യുന്നു. ഒരു പുത്രൻ ഉണ്ടാകുന്നു. വരവ് ചിലവ് കണക്ക് നോക്കിക്കൊണ്ടിരിക്കെ പുത്രൻ കരയുന്നു. പുത്രന്റെ കരച്ചിൽ കേട്ടിട്ട് പെട്ടെന്ന് എഴുന്നേൽക്കുന്നു. പാദം തട്ടി സമീപത്ത് വച്ചിരുന്ന മലർപൊടി നിറഞ്ഞിരുന്ന കുടം നശിച്ചു.

कथासन्देशविषये चर्चां करोति। छात्राः चर्चायां भागभागिनः भवन्तु। कैरल्यां छात्राः स्वस्वाशयान् प्रकटयन्ति। अध्यापकः तान् क्रोडीकृत्य फलके लिखतु। अनुलेखनं छात्राः कुर्वन्ति।

क्रोडीकरणं तु केवलेन स्वप्नेन न प्रयोजनम्। प्रयत्नमेव कार्यः।

## प्रवर्तनम् 5

### उद्देश्यम् - कथायाः अनन्तरभागं भावनानुसारं कथनम्।

### प्रक्रिया

अध्यापकः कथायाः आशयान् प्रपाठ्य एवं पृच्छति ' नष्टकलशः दरिद्रः पुनः किमकरोत् ' इति। छात्रा स्वस्वभावनानुसारं वदन्तु। मध्ये मध्ये साहाय्यं ददातु। कैरल्यां केचन छात्रा एवं वदेयुः। अध्यापकः क्रोडीकृत्य लिखतु।

1. सः बालः पुनरपि कर्मसु व्यापृतोऽभवत्।

2. दिवास्वप्ने प्रयोजनं न इति ज्ञात्वा कर्मणि व्यापृतः।

3. दुःखेन दिनद्वयं कर्म न अकरोत्। पुनः कर्मसु व्यावृतेऽपि।

## प्रवर्तनम् 6

### उद्देश्यम् - पदानां अर्थलेखनम्

### प्रक्रिया

अध्यापकः शब्दकोशं निरीक्ष्य पदानाम् अर्थान् लिखितुं छात्रान् निर्दिशतु। छात्रैः लिखितं परिशोधयति। अन्ते साध्वर्थान् फलके लिखतु।

वसति താമസിക്കുന്നു (निवसति)
प्राप्नोति പ്രാപിക്കുന്നു (लभते)
कूपः കിണർ (अन्धुः)
उलूकः മൂങ്ങ (दिवान्धः)
प्रतिक्रिया പരിഹാരം (परिहारः)